The commentary of Raghunātha, known as Prākṛtānanda, is important because of the fact that it is a later recast of Vararuci's Prakrit grammar, Raghunātha re-arranges the sūtras of Vararuci on a line which resembles the system of Laghusidhāntakaumudī with regard to Panini. Prākṛtānanda is divided into two sections each of which is divided into a number of sub-sections indicated by *iti*. The last three sections of Vararuci's grammar are altogether omitted by him.

**SAQ**

Write a note on the commentators of the *Prākṛta-Prakāśa*

..........................................................................................

..........................................................................................

## 4.12 Summing up

A study of the Prakrit language, it shown that Prakrit is the common name given to the various dialects which sprang up in early times of India, from the corruption of the Sanskrit. Indian grammarians consider Prakrit as a literary language derived from Sanskrit. Prakrit grammar was kind of continuation of Sanskrit grammar in which rules for derivation of Prakrit words from Sanskrit were given. Vararuci, the author of *Prākṛta-Prakāśa*, has treated only four dialects of Prakrit. In this unit, you are acquinted with this fact of the Prakrit language. You are also aware of the various uses of Prakrit as well as different types of Prakrits. You have also got some informations regarding the commentators of the *Prākṛta-Prakāśa* and the contents of the *Prākṛta-Prakāśa*.

## 4.13 Sampel Questions

Answer the following questions: (of about 500 words)

1. Discuss the three periods of Indo-Aryan language
2. Write a note on the various dialects of Prakrit
3. Briefly discuss the contents of the *Prākṛta-Prakāśa*.
4. Give an idea about the commentators of the *Prākṛta-Prakāśa*

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

5. Write short notes on:
   Mahārāsṭrī, Śaurasenī, aj-vidhi, Saṁjukta-varṇa-vidhi.

## 4.14 Suggested Readings

Benerjee, Satya Ranjan: *The Prākṛta-Prakāśa of Vararuci*, Sanskrit Pustak Bhandar, Kolkata, 1975.

Cowell, E.B.: *The Prākṛta-Prakāśa: of Vararuchi*, Cosmo Publications, New Delhi 02, 1977

Benerjee, Satya Ranjan: *The Eastern School of Prakrit gramarians*, Vidyasagar Pustak Mandir, Calcutta-9, 1977

Woolener, Alfred. C: *Introduction to Prakrit,* Motilal Banarsidass, Delhi, 1986 (Reprint)

Sircar, Dinees Chanda: *A Grammar of the Prakrit language,* Motilal Banarsidass, Delhi, 1943

Winternitz, Maurice: *History of Indian literature,* Vol.III, Motilal Banarsidass, Delhi, 1985

Pathak, (Dr.) Jamuna: (ed) *Prākṛta-Prakāśa,* Chowkhamba Krishandas Academy, Varanasi, 2007.

Goswami, (Dr.) Kesavananda Dev, and (Dr.) Bhim Kanta Boruah: *Prākṛt Pāth,* Banalata, Dibrugarh, (Assamese)

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

# Unit-V
# Prākṛta-Prakāśa: First three Chapter

**Contents**

5.1 Introduction
5.2 Objectives
5.3 Prākṛta-Prakāśa : First Pariccheda.
5.4 Prākṛta-Prakāśa : Second Pariccheda.
5.5 Prākṛta-Prakāśa : Third Pariccheda.
5.6 Summing up.
5.7 Suggested Readings.

## 5.1 Introduction

It is already Stated that the mediaeval or middle Indo-Aryan Peroid is represented in literature by Pāli and the Prakrits. Vararuci is the oldest extant Prākṛta grammarian of the estern school. His Prākṛta work Prākṛta-Prakāśa, is a very famous as well as foremost Prākṛta grammar. This grammer constist of twelve chapters. In this unit, the first three chapters termed as Pariccheda has been dealt with. The first chapter is on vowel, which is named as *saravidhānam* or ajvdhānam. In this chapter the changing pattern of vowels of the Prākṛta words have been delinated. In the second chapter, the changing pattern of simple consonants have been suggested. The chapter is known as the chapter on *ayuktavidhi*. The third chapter is on conjuncts, which is known as yuktavidhi. In this chapter the changing pattern of the conjuncts consonants have been described.

The chapters are arranged in this unit with the original Sūtras. With their Padaccheda or separate of words, With a Vṛtti and with some examples of the Sūtras. The vṛtti is known as *Manoramā* composed by Bāmaha.

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

## 5.2 Objectives

The objectives of this unit is to help you in

. familirarzing the first three chapters of the Prākṛta-Prakāśa

. knowing some of the major sūtras related with the Prākṛta language.

. acquiring the knowledge about the changing pattern vowels, consonents and conjunct consonants.

. acquiring the knowledge of various form of Prākṛta words.

## 5.3 Prākṛta-Prakāśa : First Pariccheda :

प्रथम : परिच्छेद :

(स्वरविधानम्)

1. आदेरत : ॥

पदच्छेद -आदे: ।अत:।

वृत्ति : -अधिकारोऽयम्। यत् इत उद्ध्र्वम् अनुक्रमिष्याम आदेरत: स्थाने तद् भवति इति एवं वेदितव्यम्। आदे इति एतद् आपरिच्छेदसमाप्ते: ।अत इति च आकार विधानात्। अत इति तकारग्रहणं सवर्णनिवृत्त्यर्थम्।

This is अधिकारसूत्र. There are two अधिकार words -आदि and अत: the word 'आदे' will be covered till end the first chapter and the word 'अत' will be covered upto the sūtra 'चतुर्थीचतुर्दश्योस्तुना'.

### Stop to Consider

**अधिकारसूत्र** - There are six types of सुत्र ऽ are found in the grammar. These are संज्ञा, परिभाषा, विधि, नियम अतिदेश and अधिकार. अधिकार is a superintending aphorism, which goes no meaning of itself where it is mentioned, but gives its meaning in the number of aphorisms that follows.

**सवर्ण**-सवर्ण means cognate, homophonic; a letter belonging to the some technical categrory of letters possessing an identical place of utterance and internal effort तुल्यास्यप्रयत्नं सवर्णम्। for example, the eighteen varieties of अ due to its short, long and protracted nature, are savarṇa to each other.

2. आ समृद्ध्यादिषु वा।

पदच्छेद-आ। समृद्धि-आदिषु। वा।

वृत्ति : समृद्धि-इति एवम् आदिषु शब्देषु प्राकृतभाषायाम् आदे: अकारस्य स्थाने आकारो भवति विकल्पेन। अत्र आदे: अकारस्य इति शब्दद्वयं 'आदेरत:' इति अधिकारसूत्रात् अधिकाररुपेण प्राप्तम्। यथा-

समृद्धि: = समिद्धी/सामिद्धी [सामृद्धि >सामिद्धि>सामिधि> सामिध्धि>सामिद्धि> सामिद्धी]

प्रकटम् = पाअडं/पअडं

अभिजाति = आहिजाई/अहिजाई

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

मनस्विनी = माणंसिणी/मणंसिणी
पतिपदा = पाडिवआ/पडिवआ
सदृक्षम् = सारिच्छं/सरिच्छं
प्रतिषिद्धि = पाडिसिद्धी/पडिसिद्धी
प्रसुप्तम् = पासुत्तं/ पसुत्तं
प्रसिद्धिः = पासिद्धी/पसिद्धी
अश्वः = आसो/अस्सो

**Stop to consider**

वा-वा is a team often used in the Sµutras PŒÄini and others, to show the optional application (विकल्प) of a rule 'न वेति विभाषा'.

3. इदीषत्पक्वस्वप्नवेतसव्यजनमृदङ्गारेषु।
पदच्छेद - इत्। ईषत् -पक्व-स्वप्न-वेतस-व्यजन-मृदङ्ग-अङ्गारेषु।
वृत्ति : - ईषत् आदिषु केषुचित् शब्देषु प्राकृतभाषायाम् आदेः अकारस्य स्थाने इकारस्य आदेशो भवति। यथा

| | | |
|---|---|---|
| ईषत् | = | इसि [ईषित् > इषित् > इसित् > इसि] |
| पक्वम् | = | पिक्कं |
| स्वप्नः | = | सिविणो |
| वेतसः | = | वेडिसो |
| व्यजनः | = | विअणो |
| मृदङ्ग | = | मिइंगो |
| अङ्गार : = | इंगालो | |

4. लोपोरण्ये।
पदच्छेद - लोपः ।अरण्ये।
वृत्तिः- = अरण्यशब्दे आदि-अकारण्य लोपो भवति। यथा-
अरण्यम् = रण्णं [रण्यम्>रणम्>रण्णम्> रण्णं]

5. ए शय्यादिषु।
पदच्छेद - ए। शय्या-आदिषु।
वृत्ति : शय्या इति एवम् आदिषु आदि-अकारस्य स्थाने एकारस्य आदेशो भवति। यथा-

| | | |
|---|---|---|
| शय्या | = | सेज्जा [शोय्या>सेय्या>सेजा>सेज्जा] |
| सौन्दर्यम = | सुंदेरं | |
| उत्करः | = | उक्केरो |
| आश्चर्यम = | अच्छेरं | |
| पर्यन्तम् = | पेरन्तं | |
| त्रयोदशः = | तेरहो | |
| वल्ली | = | वेल्ली |

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com   For evaluation only.

6. ओ बदरे देन।

पदच्छेद- ओ/ बदरे/देन

वृत्तिः बदर इति शब्दे दकारेण सह आदि-अकारस्य स्थाने ओकारो भवति। देन इति द-शब्दस्य तृतीया -विभक्तेः एकवचनस्य रूपम्। शब्दोऽयं 'सहयुक्ते अप्रधाने' इति सुत्रेण 'सहार्थे' तृतीया । यथा-

बदरम् = बोरं [ ब् + अ + द + ओ]

**SAQ**

1. Explain the followings sutras :

(a) आ समृद्धयादिषु वा।

(b) लोपोऽरण्ये।

(c) ओ बदरे देन।

2. Write the Prakrit equivalents of the following :

प्रकटम् पक्वम्, सौन्दर्यम् वल्ली, अङ्गारः।

7. लवणनवमल्लिकयोर्वेन।

पदच्छेद - लवण-नवमल्लिकयोः। वेन।

वृत्तिः - लवण -नवमल्लिका इति शब्दद्वयस्य व -कारेण सह आदि अ-कारण्य स्थाने ओकारः स्यात्। यथा-

लवणम् = लोणं [ल् + अ + व = ओ]

नवमल्लिका = णोमल्लिआ

8. मयूरमयूखयोर्व्वा वा।

पदच्छेद-मयुरमयुखयोः । य्वा। वा।

वृत्तिः- मयूर मयूख इति एतयोः यू-शब्देन सह आदेरतः ओ-कारो भवति विकल्पेन। य्वा इति यू-शब्दस्य तृतीया विभ्कतेः एकवचनस्य रूपम्। यथा-

मयूरः = मोरो/मऊरो [म् + अ + य् + ऊ = ओ]

मयूखः = मोहो/मऊहो

Check your progress

Question : 1 Explain the following sμutras with examples.

(a) ए शय्यादिषु

(b) मयूरमयूखयोय्या वा।

9. चतुर्थीचतुर्दश्योस्तुना।

पदच्छेद-चतुर्थीचतुर्दश्योः। तुना।

वृत्तिः-चतुर्थी-चतुर्दशी इति एतयोः तु-शब्देन सह आदि अ-कारस्य स्थाने ओ-कारो भवति विकल्पेन। वा इति पूर्वसूत्रात् अनुवृत्तिः। यथा-

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

चतुर्थी = चोत्थी/चउत्थी [च् + अ + त् + उ = ओ]
चतुर्दशी = चोद्दही/चउद्दही

10. अदातो यथादिषु वा।
पदच्छेद - अत्। आतः । यथा-आदिषु। वा।
वृत्तिः - अत इति निवृत्तम्, स्थान्यन्तर-निर्देशात्। अर्थात् इतः परम् अ-कारस्य स्थाने इति शब्दस्य प्रयोगः न भविष्यति। अस्मिन् सूत्रे स्थान्याः परिवर्तनं अस्ति। 'आतः' इति षष्ठ्यन्तपदं स्थानि रूपम्।
यथा-इति एवम् आदिषु आतः स्थाने अर्थात् आदि आ-कारस्य स्थाने अकार आदेशो भवति विकल्पेन। यथा-

| | | |
|---|---|---|
| यथा | = | जह/जहा |
| तथा | = | तह/तहा |
| प्रस्तारः | = | पत्थरो/पत्थारो |
| प्राकृतम् | = | पउअं/पाउअं |
| तालवृन्तकम् | = | तलवेण्टअं/तालवेण्टअं |
| उत्खातम् | = | उक्खअं/उक्खाअं |
| चामरम् | = | चमरं/चामरं |
| प्रहार | = | पहरो/पहारो |
| चाटु | = | चडु/चाडु |
| दावाग्निः | = | दवग्गी/दावग्गी |
| खादितम् | = | खइअं/खाइअं |
| संस्थापितम् | = | संठविअं/संठाविअं |
| हालिकः | = | हलिओ/हालिओ |

**Stop to Consider**
**स्थानि**-स्थानि is the original word or part of a word such as a syllable or two of it or a letter of it, for which a substitute (आदेश) is prescribed, cf. 'स्थानिवदादेशोऽनाल्विधौ' for this purpose the rule of Pāṇini is 'षष्ठी स्थानेयोगा'.

11. इत्सदादिषु।
पदच्छेद -इत्। सदा-आदिषु।
वृत्ति : -सदा इति एवम् आदिषु आदि आ-कारस्य स्थाने इ-कारो भवति विकल्पेन ।
यथा-

| | | |
|---|---|---|
| सदा | = | सइ/सआ |
| तदा | = | तइ/तआ |
| यदा | = | जइ/जआ |

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

12. इत एत् पिण्डसमेषु।

पदच्छेद–इत:। एत्। पिण्ड–समेषु।

वृत्ति:–पिण्डम् इति एवं समेषु (सदृशेषु) शब्देषु आदि इकारस्य स्थाने ए –कारस्य आदेशो भवति वा। यथा–

| | | |
|---|---|---|
| पिण्डम् | = | पेण्डं/पिण्डं |
| निद्रा | = | णेद्दा/णिद्दा |
| सिन्दुरम् | = | सेदुंर (सेन्दूरं)/सिंदूरं (सिन्दूरं) |
| धम्मिल्लम् | = | धम्मेल्लं/धम्मिल्लं |
| चिह्नम् | = | चेंधं/चिंधं |
| विष्णु: | = | वेण्हू/विण्हू |
| पिष्टम् | = | पेट्ठं/पिट्ठं |

13. अत् पथिहरिद्रापृथिवीषु।

पदच्छेद–अत्। पथिहरिद्रापृथिवीषु।

वृत्ति:–पथिन्–हरिद्रा–पृथिवी–आदिषु शब्देषु आदि इ–कारस्य स्थाने अ–कारो भवति। यथा–

| | | |
|---|---|---|
| पथिन् | = | पहो [पथन्>पहन्>पह>पहो] |
| हरिद्रा | = | हलद्दा |
| पृथिवी | = | पुहवी |

14. इतेस्त: पदादे:।

पदच्छेद–इते। त:। पदादे।

वृत्ति:–पदस्य आदौ वर्तमानस्य इति शब्दस्य य: तकार: तस्मात् परस्य इकारस्य अकारो भवति। यथा–

इति पश्यत अन्याथावचनम् = इअ उअह अण्णहावअणम्।

परन्तु पदस्य पश्चाद् भागे स्थितस्य इति शब्दस्य प्रसङ्गे अस्य सूत्रस्य प्रयोग: न भवति। यथा– प्रिय इति = पिओ त्ति।

15. उदिक्षुवृश्चिकयो:।

पदच्छेद–उत्। इक्षु–वृश्चिकयो:।

वृत्ति:–इक्षु वृश्चिक –शब्दद्वयस्य आदि इकारस्य स्थाने उकारो भवति। यथा–

| | | |
|---|---|---|
| इक्षु | = | उच्छू>[उक्षु>उच्छु>उच्छू] |
| वृश्चिक: | = | विच्छुओ |

16. ईत् सिंहजिह्वयोश्च।

पदच्छेद–ईत्। सिंहजिह्वयो: । च।

वृत्ति:–सिंहजिहवयो : आदे इकारस्य स्थाने ईकारो भवति। यथा–

सिंह = सींहो, जिहवा = जीहा।

सूत्रे च–कारस्य प्रयोगात् केषुचित् अन्येषु पदेषु अपि ईत्वं भवति। उदाहरणं यथा–

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

विश्वस्तः = वीसत्थोः, विश्रम्भः = वीसंभो।

17 इदीतः पानीयादिषु।

पदच्छेद–इत्। ईतः ।पानीयादिषु।

वृत्तिः– पानीय इति एवम् आदिषु आदे ईकारस्य स्थाने इकारो भवति। यथा–

| | | |
|---|---|---|
| पानीयम् | = | पाणिअं। |
| अलीकम् | = | अलिअं। |
| व्यलीकम् | = | वलिअं। |
| तदानीम् | = | तआणिं। |
| करीष | = | करिसो। |
| द्वितीयम् | = | दुइअं। |
| तृतीयम् | = | तइअं। |
| गभीरम् | = | गहिरं। |

18. एन्नीडापीडकीदृगीदृशेषु।

पदच्छेद – एत् ।नीड–आपीड–कीदृक् –ईदृशेषु।

वृत्तिः– नीडादिषु आदे ईकारस्य स्थाने एकारो भवति। यथा –

| | | |
|---|---|---|
| नीडम् | = | णेड्डं / णेडं |
| आपीडः | = | आमेलो |
| कीदृशः | = | केरिसो |
| ईदृशः | = | एरिसो |

19. उत ओत् तुडरूपेषु।

पदच्छेद – उतः ।ओत्। तुण्डरूपेषु।

वृत्तिः– तुण्ड इति एवं रूपेषु शब्देषु आदेः उकारस्य स्थाने ओकारः भवति। यथा–

| | | |
|---|---|---|
| तुण्डम् | = | तोण्डं |
| मुक्ता | = | मोत्ता |
| पुष्करः | = | पोक्खरो |
| पुस्तकः | = | पोत्थओ |
| लुब्धकः | = | लोद्धओ |
| कुट्टिमम् | = | कोट्टिमं |

Check your Progress

Q. 2. Explain

(a) अत् पथिहरिद्रापृथिवीषु

(b) उत ओत् तुण्डरूपेषु

20. अन्मुकुटादिषु।

पदच्छेद – अत्। मुकुटादिषु।

वृत्तिः– मकुट इति एवम् आदिषु शब्देषु आदेः उकारस्य स्थाने अकारो भवति। यथा–

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

| | | |
|---|---|---|
| मुकुटम् | = | मउडं |
| गुरु | = | गरु (गरुअं) |
| गुर्वी | = | गरुई |
| युधिष्ठिर | = | जहिट्ठिलो |
| सौकुमार्यम् | = | सोअमल्लं। |

21. इत्पुरुषे रोः
पदच्छेद - इत्। पुरुषे। रोः
वृत्तिः- पुरुष शब्दे यो रुः तस्य परस्य उकारस्य स्थाने इकारो भवति। यथा-

| | | |
|---|---|---|
| पुरुष : | = | पुरिसो। |

22. उदूतो मधूके।
पदच्छेद - उत्। ऊतः। मधूके
वृत्तिः- मधूकशब्दे आदेः ऊकारस्य स्थाने उकारो भवति। यथा-

| | | |
|---|---|---|
| मधूकम् | = | महुअं। |

23. एन्नूपुरे।
पदच्छेद - एत्। नूपुरे।
वृत्तिः- नूपुरशब्दे ऊकारस्य स्थाने एकारो भवति। यथा-

| | | |
|---|---|---|
| नूपुरम् | = | णेउरं। |

24. ऋतोऽत्।
पदच्छेद - ऋताः । अत्।
वृत्तिः- पदेषु आदेः ऋकारस्य स्थाने अकारो भवति। यथा-

| | | |
|---|---|---|
| तृणम् | = | तणं। |
| घृणा | = | घणा। |
| मृतम् | = | मअं। |
| कृतम् | = | कअं। |
| वृषभः | = | वसहो। |

25. इदृष्यादिषु।
पदच्छेद - इत्। ऋषि आदिषु।
वृत्तिः- ऋषि आदिषु शब्देषु आदेः ऋकारस्य इकारो भवति। यथा-

| | | |
|---|---|---|
| ऋषिः | = | इसी |
| वृषीः | = | विसी |
| गृष्टिः | = | गिट्ठी |
| दृष्टिः | = | दिट्ठी |
| सृष्टिः | = | सिट्ठी |
| शृङ्गारः | = | सिङ्गारो |

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

| | | |
|---|---|---|
| मृगाङ्क : | = | मिअंको |

26. उदृत्वादिषु।

पदच्छेद – उत्। ऋतु आदिषु।

वृत्तिः– ऋतु इति एवम् आदिषु आदेः ऋकारस्य स्थाने उकारो भवति। यथा–

| | | |
|---|---|---|
| ऋतु | = | उदू। |
| मृणालः | = | मुणालो |
| पृथिवी | = | पुहवी |
| प्रावृष् | = | पाउसो |
| मातृकः | = | माउओ |

27. ऋ रीति।

पदच्छेद – ऋ। रि–इति।

वृत्तिः– वर्णान्तरेण अयुक्तस्य आदेः ऋकारस्य रिकारो भवति। यथा–

| | | |
|---|---|---|
| ऋणम् | = | रिणं |
| ऋद्धः | = | रिद्धो |
| ऋक्षः | = | रिच्छो |

Check your progress

Q.1 Explain

(a) उदृत्वादिषु

(b) ऋ रीति

28. वृक्षे वेन रुर्वा।

पदच्छेद – वृक्षे। वेन। रुः । वा।

वृत्तिः– वृक्षशब्दे वशब्देन सह ऋकारस्य रुकारो भवति । यथा–

| | | |
|---|---|---|
| वृक्षः | = | रुक्खो/वच्छो |

29. एत इद्वेदनादेवरयोः।

पदच्छेद – एतः । इत्। वेदनादेवरयोः।

वृत्तिः– वेदना देवरयोः आदेः एकारस्य इकारो भवति। वा इति अनुवृत्तेः ग्रहणात् क्वचिद्

वेअणा, देअरो इत्यपि। यथा–

| | | |
|---|---|---|
| वेदना | = | विअणा/वेअणा |
| देवर | = | दिअर/देअरो |

30. ऐत एत्

पदच्छेद – ऐतः । एत्।

वृत्तिः आदेः ऐकारस्य एकारो भवति। यथा–

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

| | | |
|---|---|---|
| शैल | = | सेलो |
| शैत्यम् | = | सेच्चं |
| ऐरावण: | = | एरावणो |
| कैलाश: | = | कलासो |
| त्रैलोक्यम् | = | तेल्लोक्कं |

31. दैत्यादिष्वइ।
पदच्छेद - दैत्य-आदिषु। अइ।
वृत्ति: दैत्य आदिषु शब्देषु आदे: ऐकारस्य अइ इति इयम् आदेशो भवति। तथा-

| | | |
|---|---|---|
| दैत्य | = | दइच्चो [द + अइ + च्च + ओ] |
| चैत्र: | = | चइत्तो |
| भैरव: | = | भइरवो |
| स्वैरम: | = | सइरं |
| वैशाख: | = | वइसाहो |

32. औत ओत्।
पदच्छेद - औत: । ओत्।
वृत्ति: आदि औकारस्य ओकारो भवति। यथा-

| | | |
|---|---|---|
| कौमुदी | = | कोमुई |
| यौवनम् | = | जोव्वणं |
| कौस्तुम | = | कोत्थुहो |

33. पौरादिष्वउ।
पदच्छेद - पौर-आदिषु। अउ।
वृत्ति: पौर इति एवम् आदिषु शब्देषु औकारस्य अउ इति अयम् आदेशो भवति। यथा-

| | | |
|---|---|---|
| पौर: | = | पउरो |
| कौरव: | = | कउरवो |
| पौरुष | = | पउरिसो |

SAQ
1. Explain the following Sµutas:
(a) इदीत: पानीयादिषु।
(b) इदृष्यादिषु
(c) वृक्षे वेन रुर्वा।

2. Write Sanskrit equivalents of the following:
लोणं, मोहो, चोत्थी, जह, पुहवी।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

## 5.4. Prākrṭa-Prakāśa :
## Second Pariccheda

**द्वितीयः परिच्छेदः**
(युक्तविधानम्)

1. अयुक्तस्यानादौ।
पदच्छेद– अयुक्तस्य। अनादौ।
वृत्तिः – सूत्रोऽयम् अधिकारः ।इत उत्तरं यत्कार्यं भविष्यति तद् अयुक्तस्य व्यञ्जनस्य अनादौ वर्तमानस्य कार्यं भवति एवं वेदितव्यत्। सूत्रेऽस्मिन् अधिकाररूपेण अयुक्तस्य अनादी च इति शब्दद्वयम् उपलभ्यते।'अयुक्तस्य' इति शब्दस्य अधिकारः अस्य अध्यायस्य समाप्तिः पर्यन्तं भवति ।तथा 'अनादौ' इति पदस्य प्रयोगः 'आ जकारविधानात्' अर्थात 'आदेर्यो जः' (2.31)
इति सूत्रस्य पूर्वसूत्र (2.30) पर्यन्तम्। सूत्रे 'अयुक्तस्य' प्रयोगात् अत्र न भवति – अर्घः = अग्घो।'अनादौ' इति प्रयोगात् अत्रापि न भवति कमलम् = कमलं।

2. कगचजतदपयवां प्रायो लोपः।
पदच्छेद– क–ग–च–ज–त–द–प–य–वाम्। प्रायः। लोपः।
वृत्ति : कादीनां नवानां वर्णानाम् अयुक्तानाम् अनादौ वर्तमानानां प्रायो बाहुल्येन लोपो भवति। यथा–

| | | |
|---|---|---|
| कवर्णस्य | – | मुकुलः = मउलो [म् + उ + क् + उ + ल् + अ] |
| | | नकुल : = णउलो |
| गवर्णस्य | – | सागरः = साअरो |
| | | नगरम् = णअरं |
| चवर्णस्य | – | वचनम् = वअणं |
| | | सूची = सूई |
| जवर्णस्य | – | गजः = गओ |
| | | रजतम् = रअदं |
| तवर्णस्य | – | कृतम् = कअं |
| | | वितानम् = विआणं |
| दवर्णस्य | – | गदा = गआ |
| | | मदः = मओ |
| पवर्णस्य | – | कपिः = कई |
| | | विपुलम् = विउलं |
| यवर्णस्य | – | वायुः = बाऊ |
| | | नयनम् = णअणं |
| ववर्णस्य | – | जीवम् = जीअं |
| | | दिवसः = दिअसो |

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

सूत्रे प्राय: इति पदस्य प्रयोगो भवति। प्रायो ग्रहणात् यत्र श्रुतिसुखमस्ति तत्र एतेषां वर्णनां लोप: न भवति । यथा–

| | | |
|---|---|---|
| सुकुसुमम् | = | सुकुसुमं |
| प्रियगमनम् | = | पिअगमणं |

3. यमुनायां मस्य।

पदच्छेद–यमुनायाम् । मस्य।

वृत्ति: – यमुनाशब्दे मकारस्य लोपो भवति। यथा–

| | | |
|---|---|---|
| यमुना | = | जउणा। |

4. स्फटिकनिकषचिकुरेषु कस्य ह:।

पदच्छेद–स्फटिक –निकष–चिकुरेषु। कस्य। ह:।

वृत्ति: – स्फटिक:, निकष:, चिकुर:–एषु शब्देषु अयुक्तस्य अनादौ–स्थितस्य ककारस्य हकारो भवति। यथा–

| | | |
|---|---|---|
| स्फटिक: | = | फलिहो |
| निकष: | = | णिहसो |
| चिकुर : | = | चिहुरो |

5. ऋत्वादिषु तो द:।

पदच्छेद–ऋतु–आदिषु। त: द:।

वृत्ति: – ऋतु इति एवम् आदिषु तकारस्य दकारो भवति। यथा–

| | | |
|---|---|---|
| ऋतु : | = | उदू। |
| रजतम् | = | रअदं |
| आगत : | = | आअदो |
| निर्वृति: | = | णिव्वुदो |
| सुकृति : | = | सुइदी |

6. प्रतिसरवेतसपताकासु ड:।

पदच्छेद–प्रतिसर –वेतस–पताकासु। ड:।

वृत्ति: – प्रतिसर:, वेतस:, पताका–एषु शब्देषु तकारस्य डकारो भवति। यथा–

| | | |
|---|---|---|
| प्रतिसर: | = | पडिसरो |
| वेतस: | = | वेडिसो |
| पताका | = | पडाआ |

Check your progress

Q.1 Explain the following sutras:

(a) यमुनायां मस्य

(b) ऋत्वादिषु तो द:

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

7. वसतिभरतयोर्हः।

पदच्छेद–वसति –भरतयो: ।ह:।

वृत्तिः – वसति–भरतशब्दयो अयुक्तस्य तथा अनादिभूतस्य तकारस्य हकारो भवति। यथा–

| | | |
|---|---|---|
| वसतिः | = | वसही |
| भरतः | = | भरहो |

8. प्रदीप्तकदम्बदोहदेषु दो लः।

पदच्छेद–प्रदीप्त कदम्ब –दोहदेषु ।दः ।लः।

वृत्तिः – प्रदीप–कदम्ब–दोहद–एषु शब्देषु अयुक्तस्य अनादिभूतस्य दकारस्य लकारो भवति। यथा

| | | |
|---|---|---|
| प्रदीप्तम् | = | पलित्तं |
| कदम्बः | = | कलम्बो |
| दोहदः | = | दोहलो |

9. संख्यायाञ्च।

पदच्छेद–संख्यायाम् ।च।

वृत्तिः – संख्यावाचिनि शब्दे यो दकारस्तस्य रेफादेशो भवति। यथा–

| | | |
|---|---|---|
| एकादश | = | एआरह |
| द्वादश | = | बारह |
| त्रयोदश | = | तेरह |

**SAQ**

1. Explain the following Sμutras:

(a) कगचजतदपयवां प्रायो लोपः।

(b) यमुनायां मस्य।

(c) वसतिभरतयोर्हः।

2. Write the Prakrit equivalents of the following words:

नकुलः विपुलम्, स्फटिकः, ऋतुः, त्रयोदशः।

10. पो वः।

पदच्छेद–पः ।वः।

वृत्तिः – पकारस्य अयुक्तस्य अनादिवर्तिनो वकारदेशो भवति। यथा–

| | | |
|---|---|---|
| शापः | = | सावो |
| शपथ : | = | सवहो |
| उलपः | = | उलवो |

'कगचजतदपयवां प्रायो लोपः' इत्यनेन सूत्रेणाऽपि अयुक्तस्य अनादौ वर्तमानस्य पकारस्य लोपः भवति इति दृश्यते। परंतु तस्मिन् सूत्रे प्रायोग्रहणाद् यत्र पकारस्य लोपो न भवति तत्र अयं विधिः प्रयुज्यते।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

11. उत्तरीयानीययोर्ज्जो वा।

पदच्छेद–उत्तरीय ।अनीय।योः ।ज्जः।वा।

वृत्तिः – उत्तरीशशब्देऽनीयप्रत्ययान्ते च यस्य ज्जो भवति वा ।यथा–

| | | |
|---|---|---|
| उत्तरीयम् | = | उत्तरिज्जं/उत्तरीअं |
| रमणीयम् | = | रमणिज्जं/रमणीअं |

13. सटाशकटकैटभेषु ढः।

पदच्छेद–सटा–शकट–कैटभेषु ।ढः।

वृत्तिः – सटा–शकट–कैटभ–एतेषु शब्देषु टकारस्य ढकारो भवति।यथा–

| | | |
|---|---|---|
| सटा | = | सढा |
| शकटः | = | सअढो |
| कैटभः | = | कैढवो |

14. ठो ढः।

पदच्छेद–ठः।ढः।

वृत्तिः – अयुक्तस्य अनादिभूतस्य ठकारस्य ढकारो भवति।यथा–

| | | |
|---|---|---|
| मठम् | = | मढं |
| जठरम् | = | जढरं |
| कठोरम् | = | कढोरं |

15. फो भः।

पदच्छेद–फः ।भः।

वृत्तिः – फकारस्य अयुक्तस्य अनादि भुतस्य भकारो भवति।यथा–

| | | |
|---|---|---|
| शिफा | = | सिभा |
| शोफालिका | = | सेभालिआ |

16. खघयधभां हः।

पदच्छेद–ख–घ–थ–ध–भाम्।हः।

वृत्तिः – खादीनां पञ्वानाम् अयुक्तानाम् अनादिवर्तिनां हकारो भवति।यथा–

| | | |
|---|---|---|
| मुखम् | = | मुहं |
| मेघः | = | मेहो |
| गाथा | = | गाहा |
| राधा | = | राहा |
| सभा | = | सहा |

17. हरिद्रादीनां रो लः।

पदच्छेद–हरिद्रादीनाम् ।रो।लः।

वृत्तिः – हरिद्रा इति एवम् आदीनां शब्दानां रेफस्य लकारो भवति।यथा–

| | | |
|---|---|---|
| हरिद्रा | = | हलद्दा |

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

| | | |
|---|---|---|
| चरण: | = | चलणो |
| युधिष्ठिर: | = | जहिट्ठिलो |
| सुकुमार: | = | सुउमालो |
| अङ्गार: | = | इङ्गालो |

18. आदेर्यो ज:।

पदच्छेद–आदे: ।य:।ज:।

वृत्तिः – अनादे: इति निवृत्तम। आदिभूतस्य यकारस्य जकारो भवति। यथा–

| | | |
|---|---|---|
| यष्टि | = | जट्ठी |
| यश: | = | जसो |
| यश: | = | जसो |
| यक्ष: | = | जक्खो |

19. दोलादण्डदशनेषु ड:।

पदच्छेद–दोला–दण्ड–दशनेषु।ड:।

वृत्तिः – दोला–दण्ड–दशन–इत्यादिषु शब्देषु आदे: वर्णस्य डकारो भवति। यथा–

| | | |
|---|---|---|
| दोला | = | डोला |
| दण्ड: | = | डंडो |
| यश: | = | जसो |
| दशन: | = | डसणो |

20. परुषपरिघपरिखासु फ:।

पदच्छेद–परुष–परिघ–परिखासु।फ:।

वृत्तिः – परुष:, परिघ:, परिखा–एतेषु शब्देषु आदेर्वर्णस्य फकारो भवति। यथा–

| | | |
|---|---|---|
| पुरुष: | = | फरुसो |
| परिघ: | = | फलिहो |
| परिखा | = | फलिहा |

21. षट्शावकसप्तपर्णानां छ:।

पदच्छेद–षट्–शावक–सप्तपर्णानां ।छ:।

वृत्तिः – षट्–शावक–सप्तपर्ण–एतेषाम् आदे: वर्णस्य छकारो भवति। यथा–

| | | |
|---|---|---|
| षष्ठी | = | छट्ठी |
| षण्मुख: | = | छम्मुहो |
| सप्तपर्ण | = | छत्तवण्णो |
| शावक: | = | छावओ |

22. नो ण: सर्वत्र।

पदच्छेद–न: ।ण:।सर्वत्र।

वृत्तिः – आदेरिति निवृत्तम। सर्वत्र नकारस्य णकारो भवति। यथा–

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com   For evaluation only.

| | | |
|---|---|---|
| नदी | = | णई |
| कनकम् | = | कणअं |
| वचनम् | = | वअणं |
| मनस्विनी | = | मणंसिणी |

Check your progress

Q. 1. Explain the following Sutras:

(a) हरिद्रादीनां रो लः।

(b) दोलादण्डदशनेषु डः

23. शषोः सः।

पदच्छेद-शषोः ।सः।

वृत्तिः - सर्वत्र शकार-षकारयोः सकारो भवति। सर्वत्र इति शब्दस्य अस्मिन् सूत्रे अनुवृत्तिर्भवति। यथा-

| | | |
|---|---|---|
| शब्दः | = | सद्दो |
| निशा | = | णिसा |
| अंशः | = | अंसो |
| वृषभः | = | वसहो |
| कषायम् | = | कसाअं |

24. दशादिषु हः।

पदच्छेद-दश-आदिषु।हः।

वृत्तिः - दश इति एवम् आदिषु शकारस्य हकारो भवति। यथा-

| | | |
|---|---|---|
| दश | = | दह |
| एकादश | = | एआरह |
| द्वादश | = | बारह |
| त्रयोदश | = | तेरह |

**SAQ**

Q. 1. Explain the following Sμutras:

(a) पो वः

(b) आदेर्यो जः।

(c) नो णः सर्वत्र।

Q. 2. Write the Sanskrit equivalents of the following word:

रमणिज्जं मढं, सहा, हलद्दा, फरुसो

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

### 5.5 Prākṛta-Prakāśa :Third Pariccheda:

**तृतीय: परिच्छेद:**

**( युक्तविधानम् )**

1.उपरि लोप: कगडतदपषसाम्।

पदच्छेद–उपरि। लोप:। कगडतदपषसाम्।

वृत्ति: – अस्मिन् अध्याये युक्तवर्णानां परिवर्तन: लोपो: वा विषये विधानम् उपलभ्यते। कादीनाम् अष्टानां वर्णानां युक्तस्य उपरिस्थितानां लोपो भवति। यथा–

| | | |
|---|---|---|
| कस्य लोप: | – | भक्तम् = भत्तं |
| | | सिक्थकम् = सित्थअं |
| गस्य लोप: | – | मुग्ध: = मुद्धो |
| | | स्निग्ध: = सिणिद्धो |
| डस्य लोप: | – | खड्ग: = खग्गो |
| तस्य लोप: | – | उत्पलम् = उप्पलं |
| | | उत्पात: = उप्पाओ |
| दस्य लोप: | – | मुद्रा: = मुग्गा |
| | | मुद्गर: = मुग्गरो |
| पस्य लोप: | – | सुप्त: = सुत्तो |
| षस्य लोप: | – | गोष्ठी = गोट्ठी |
| | | निष्ठुर: = णिट्ठुरो |
| सस्य लोप: | – | स्खलितम् = खलिअं |
| | | स्नेह: = णेहो |

2. अधो मनयाम्।

पदच्छेद–अध:। मनयाम्।

वृत्ति: – मकार–नकार–यकाराणां युक्तस्य अध: स्थितानां लोपो भवति। यथा–

| | | |
|---|---|---|
| शुष्मम् | = | सोस्सं |
| रश्मि: | = | रस्सी |
| नग्न: | = | णग्गो |
| सौम्य: | = | सोम्मो |
| योग्य: | = | जोग्गो |

3. सर्वत्र लवराम्।

पदच्छेद–सर्वत्र। लवराम्।

वृत्ति: – लकार–वकार–रेफाणां सर्वत्र अर्थात् युक्तस्य उपरि अध: वा स्थितानां लोपो भवति। यथा–

| | | |
|---|---|---|
| उल्का | = | उक्का |
| विक्लव: | = | विक्कवो |
| पक्वम् | = | पिक्कं |

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

अर्कः = अक्को
शक्रः = सक्को

4. द्रे रो वा।
पदच्छेद–द्रे ।रः।वा।
वृत्तिः – द्रशब्दे रेफस्य लोपो भवति विकल्पेन। यथा–
द्रोहः = दोहो/द्रोहो
चन्द्रः = चन्दो/चन्द्रो
रुद्रः = रुद्दो/रुद्रो

5. सर्वज्ञतुल्येषु ञः।
पदच्छेद–सर्वत्र–तुल्येषु ञः।
वृत्तिः – सर्वत्र तुल्येषु शब्देषु ञकारस्य लोपो भवति। यथा–
सर्वज्ञः = सव्वजो
इङ्गितज्ञ : = इङ्गिअज्जो

6. श्मश्रुश्मशानयोरादेः।
पदच्छेद–श्मश्रु–श्मशानयोः आदेः।
वृत्तिः – श्मश्रु–श्मशान–शब्दयोः आदेः वर्णस्य लोपो भवति। यथा–
श्मश्रु = मस्सु
श्मशानम् = मसाणं

7. मध्याह्ने हस्य।
पदच्छेद–मध्याह्वे।हस्य।
वृत्तिः – मध्याह्व–शब्दे हकारस्य लोपो भवति। यथा–
मध्याह्वः = मज्झण्णो

8. ह्नह्लह्मषु नलमां स्थितिरुर्ध्वम्।
पदच्छेद–ह्न–ह्ल–ह्मेषु।नलमाम्।स्थितिः।ऊर्ध्वम्।
वृत्तिः – ह्न–ह्ल–ह्म–इति एषु अधः स्थितानां नकार–लकार–मकाराणां स्थितिरुर्ध्वम् उपरिष्टाद् भवति। यथा–
पूर्वाह्वः = पुव्वण्हो
अपराह्नः = अवरण्हो
आह्लादः = ल्हा
ब्राह्मणः = बम्हणो

9. युक्तस्य
वृत्तिः – अधिकारः सूत्रोऽयम् अधिकारोऽयम् आपरिच्छेदसमाप्तेः। यत् इत ऊर्ध्वम् अनुक्रमिष्यामो युक्तस्य इति एवं वेदितव्यम्। यथा–
अस्थिः = अट्ठी

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

10. ष्टस्य ठः।

पदच्छेद-ष्टस्य। ठः।

वृत्तिः - ष्ट इति एतस्य युक्तस्य स्थाने ठकारो भवति। यथा-

| | | |
|---|---|---|
| यष्टिः | = | लट्ठी [यठि>यठ्ठि>यट्ठि>लट्ठि>लट्ठी] |
| दृष्टिः | = | दिट्ठी |

**SAQ**

Q. 1. Explain the following Sutras:

(a) उपरि लोपः कगडतदपषसाम्।

(b) सर्वत्र लवराम्।

(C) ष्टस्य ठः।

Q. 2. Write the Sanskrit equivalents of the following word:

भत्तं, सोस्सं, उक्का, दोहो, पुव्वण्हो।

11. स्तस्य थः।

पदच्छेद-स्तस्य। थः।

वृत्तिः - स्त इति एतस्य युक्तस्य स्थाने थकारो भवति। यथा-

| | | |
|---|---|---|
| हस्तः | = | हत्थो |
| समस्तः | = | समत्थो |
| स्तुतिः | = | थुई |

12. स्तम्भे खः।

पदच्छेद-स्तम्भे। खः।

वृत्तिः - स्तम्भशब्दे स्तकारस्य खकारो भवति। यथा-

| | | |
|---|---|---|
| स्तम्भः | = | खंभो। |

13. स्थाणावहरे।

पदच्छेद-स्थाणौ । अहरे।

वृत्तिः - स्थाणु-शब्दे युक्तस्य खकारो भवति, किंतु अहरे अर्थात् हरे (महादेवशिव) अभिधेये न भवति। यथा-

| | | |
|---|---|---|
| स्थाणुः | = | खाणू। |

हरः अभिधेये तु थाणू इति

14. र्यशय्याभिमन्युषु जः।

पदच्छेद-र्य-शय्या-अभिमन्युषु। जः।

वृत्तिः - र्य इत्यस्य शय्या -अभिमन्यु-शब्दयोः च युक्तस्य जकारो भवति। यथा-

| | | |
|---|---|---|
| कार्यम् | = | कज्जं। |

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

| | | |
|---|---|---|
| शय्या | = | सेज्जा |
| अभिमन्युः | = | अहिमज्जू। |

15. तूर्यधैर्यसौन्दर्याश्चर्यपर्यन्तेषु रः।
पदच्छेद-तूर्य-धैर्य-सौन्दर्य-आश्चर्य-पर्यन्तेषु।रः।
वृत्तिः- तूर्य-धैर्य-सौन्दर्य-आश्चर्य-पर्यन्त-एतेषु शब्देषु र्य-इति युक्यस्य स्थाने रेफो भवति।

**Check your Progress**

Q. 6. Explain the following Sutras:
(a) युक्लस्य
(b) स्तम्भे खः

यथा-

| | | |
|---|---|---|
| तूर्यम् | = | तूरं |
| धैर्यम् | = | धीरं |
| सौन्दर्यम् | = | सुन्देरं |
| आश्चर्यम् | = | अच्छेरं |
| पर्यन्तम् | = | पेरन्तं |

16. चौर्यसमेषु रिअं।
पदच्छेद-चौर्यसमेषु।रिअं।
वृत्तिः - चौर्यसमेषु अर्थात् सदृशेषु र्य-इत्यस्य रिअम् इति आदेशो भवति। यथा-

| | | |
|---|---|---|
| चौर्यम् | = | चोरिअं (चौरिअंऽ चोरिअं) |
| शौर्यम् | = | सोरिअं |
| वीर्यम् | = | वीरिअं |

17. र्तस्य टः।
पदच्छेद-र्तस्य।टः।
वृत्तिः - र्त इत्यस्य युक्तस्य टकारो भवति। यथा-

| | | |
|---|---|---|
| कैवर्तकः | = | कैवट्टओ |
| नर्तकः | = | णट्टओ |

18. न धूर्तादिषु
पदच्छेद-न।धूर्त-आदिषु।
वृत्तिः -धुर्त इति एवम् आदिषु र्त इति एतस्य टकारो न भवति। यथा-

| | | |
|---|---|---|
| धूर्तः | = | धुत्तो |
| कीर्तिः | = | कित्ति |
| वार्ताः | = | वत्ता |
| मूर्ति | = | मुत्ती |

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

SAQ

Q. 1. Explain the following Sμutras:

(a) स्तस्य थः।

(b) स्थाणावहरे।

(C) र्तस्य टः।

Q. 2. Write the Prakrit equivalents of the following word:

हस्तः, स्थाणुः, कार्यम्, तूर्यम्, धूर्तः।

19. त्यथ्यद्यां चछजाः।

पदच्छेद-त्य-थ्य-द्याम्। च-छ-जाः।

वृत्तिः -त्य-थ्य-द्य-इत्येतेषां युक्तानां स्थाने यथासंख्यं च-छ-ज इति एते भवन्ति । यथा-

त्यस्य-नित्यम् = णिच्चं

प्रत्यक्षम् = पच्चच्छं

थ्यस्य-रथ्या = रच्छा

मिथ्या = मिच्छा

द्यस्य-विद्या = विज्जा

वैद्यः= वेज्जो

20. अक्ष्यादिषु च्छः।

पदच्छेद-अक्ष्यादिषु। च्छः।

वृत्तिः -अक्षि इति एवम् आदिषु क्षकारस्य छकारो भवति। यथा-

| | | |
|---|---|---|
| अक्षिः | = | अच्छी |
| लक्ष्मी | = | लच्छी |
| इक्षु | = | उच्छू |
| कुक्षिः | = | कुच्छी |

21. शोषादेशयोर्द्वित्वमनादौ।

पदच्छेद-शेष-आदेशयोः द्वित्वम्। अनादौ।

वृत्तिः -युक्तस्य यौ शेष-आदेशभूतौ तयोः अनादौ वर्तमान्योः द्वित्वं भवति। संयुक्त व्यञ्जनस्य कस्यापि एकस्य लोपे अवशिष्ः शेषः, यथा-आत्म् इति पदे त्म इति संयुक्ते त् वर्णस्य लोपे अवशिष्टभूतः म-वर्णः शेषः। कस्यापि व्यञ्जनस्य स्थाने कस्यापि व्यञ्जनस्य आगमनम् अत्र आदेशः। यथा आत्मन् इति शब्दे त्म-संयुक्तस्य स्थाने पकारस्य आगमनम् आदेशः। अस्य सूत्रस्य उदाहरणं यथा-

शेषस्य-भुक्तम् = भुत्तं [भुतं>भुत्तं]

मार्गः = मग्गो

आदेशस्य -यष्टि = लट्ठी [यठि>यठ्ठि>यट्ठि>लट्ठि>लट्ठी]

दृष्टि = दिट्ठी

**Model Sμutra Explanation:**

1. आ समृध्द्यादिषु वा।

आचार्य-वररुचि-प्राणीतस्त प्राकृतप्रकाशग्रन्थस्य प्रथमपरिच्छेदे सूत्रोऽयम् उपलभ्यते। परिच्छेदेस्मिन् संस्कृतशब्दनां प्राकृतभाषान्तरसमये लोपः आदेशः-आगमः -इत्यादि

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

विषयाणां नियमाः उपलभ्यन्ते। अस्य सूत्रस्य अयमेव आशायः यत् समृद्धि इति एवम्, आदिषु शब्देषु आदेः अकारस्य स्थाने प्राकृतभाषायाम् आकारो भवति। सुत्रेऽस्मिन् यद्यपि 'आदेः' 'अकारस्य' च इति शब्दद्वयस्य प्रयोगं नास्ति, तथापि 'आदेरतः' इति पूर्वसूत्रात् अधिकाररूपेण प्राप्तः। सूत्रे 'वा' पदस्य प्रयोगात् सूत्रोऽयं वैकल्पिकः, अनेन ज्ञायते यत् एषु शब्देषु आदेः अकारस्य स्थाने कदापि आकारस्य प्रयोगो भवति, कदापि न भवति। अस्य उदाहरणं यथा–

| | | |
|---|---|---|
| समृद्धि | = | सामिद्धी/समिद्धी |
| प्रकटम् | = | पाअडं/पअडं |
| अभिजातिः | = | आहिजाई/अहिजाई |

### Summing up

In this unit, you are acquinted with the first three chapters of the *Prākṛta Prakāśa*, written by Vararuci. You are aware with some rules and regulations of the Prākṛta Vyakarana. you are familier with the rules related with the simple vowels, simple consonant and conjunct consonants. You are also got some idea about the formation of the *Prākṛta* words some help of examples as described in this unit.

### Model Questions

1. Explain the follwoings Sutras:
   a) अदातो यथादिषु वा।
   b) इदृष्यादिषु वा।
   c) छायाया हः।
   d) ऐत एत्।
   e) स्थाणावहरे।

2. Write the Sanskrit equivalents of the following words:
गहिरं, पुहवी, केरिसो, पउरो, जुहिट्ठिलो, तण्हा।

3. Write the Prākṛta equivalents of the following words:
मन्मथः, ऐरावतः, चन्द्रिका, कीदृशः स्फटिकः, अङ्गारः।

### Suggested Readings

Pathak, Jamuna (ed) : *Prākṛta-Prakāśa*. Chowkhamba Krishnadas Academy, Varanasi, 2007

Banerjee, Satya Ranjan : *Prākṛta-Prakāśa* of Vararuci, Sanskrit Pustak Bhandar, Calcutta, 1975.

Hosinga, Jagannatha Sastri: *Prākṛta-Prakāśa*, Chaukhambha Sanskrit Sansthan, Varanasi, 2001.

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

# UNIT - VI
# व्यवहारिकं संस्कृतम्
# Functional Sanskrit

**विषय-सूची (Contents) :**

1.1 उद्देश्यम् (Objectives)

1.2 भूमिका (Introduction)

1.3 पत्र-लेखन् (Letter Writing)

1.3.1 परिवार-सम्बन्धीनि पत्राणि।

1.3.2 मित्र-सहपाठि-सम्बन्धीनि पत्राणि।

1.3.3 निमन्त्रण-सम्बन्धीनि पत्राणि।

1.3.4 आवेदन-(प्रार्थना)-पत्र-लेखनम्।

1.4 अपठितांशावबोधनम् (Unseen Reading Comprehension)

1.5 अशुद्धिसंशोधनम्

1.6 सारांश: (Summing up)

1.7 आदर्श-प्रश्ना: (Sample Questions)

1.8 द्रष्टव्य-ग्रन्था: Suggested Readings)

## 1.1 उद्देश्यम् (Objectives)

- अस्य अध्यायस्य अध्यनेन भवन्त:-
- संस्कृतभाषया विविधपत्राणां लेखने समर्था: भविष्यन्ति।
- संस्कृतेन आवेदनपत्राणि (प्रार्थनापत्राणि) लेखितुं प्रभविष्यन्ति।
- सरलसुरगिरा निमन्त्रणपत्राणां लेखने समर्था: भविष्यन्ति।
- बोधशक्ते: विकासं कर्तुं पारयिष्यन्ति।
- अनुच्छेदं पठित्वा तदर्थं च विज्ञाय तदाधारितान् प्रश्नान् उत्तरितुं सामर्थ्यं लप्स्यन्ते।
- पद्यं पठित्वा तदन्ययं कर्तुं तद्गतं भावें च अवगम्य तदाधारितानां प्रश्नानामुत्तरदाने साफल्यं प्राप्यन्ति।
- संस्कृतवाक्यगतानाम् अशुद्धीनां संशोखने दक्षा: भविष्यन्ति।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

- संस्कृतभाषाया: व्यवहारे साहाय्यं प्राप्स्यन्ति।

## 1.2. भूमिका (Introduction)

अस्माकं सामाजिकजीवने पत्रलेखनस्य पत्रव्यवहारस्य च महती उपयोगिता विद्यते। पत्राणि च बहुविधानि भवन्ति। यत् किमपि पत्रं भतु नाम, तादृशं पत्रमेव उपयोगि महत्व-पूर्णम् आकर्षकं, कार्यसिद्धौ च सहायकं भवति, यस्य भाषा शुद्धा सरसा हृदयग्राहिणी च भवति। अपि च यस्य पत्रस्य भावा: विस्पष्टा: औचित्यमण्डिताश्च भवन्ति। अनया दृष्ट्या विविच्यते चेत् वक्तुं युज्यते यत् पत्रलेखनं नाम एका कला भवति यया लेखकानां पत्रलेखनं प्रशंसनीयं लाभकरं च संजायते। अत एव सम्प्रति पत्रलेखनाय विभिन्नासु भाषासु विभिन्नानि पुस्तकानि प्रकाशितानि, आपणेषु, उपलब्धानि च सन्ति। तेषामध्ययनेन पाठका: विद्यार्थिन: अस्यां कलायां निपुणा: भवन्ति तथा च आत्मन: अन्येषां च हितं साधयन्ति।

किन्तु संस्कृते पत्रलेखनविषयमधिकृत्य वर्तमानरीत्या लिखितानां पुस्तकानां संख्या भूयसी नास्ति। संस्कृतभाषाया: प्राचीनसाहित्ये यद्यपि कानिचित् मुद्रितानि कानिचिच्च अनुद्रितानि पुस्तकानि विद्यन्ते, येषु पत्राणां नैके प्रकारा: वर्णिता: सन्ति। एवंविधेषु विद्यापतिठक्कुर-विरचिता लिखनावली, बालकृष्णात्रिपाठिविरचिता **प्रशस्तिकाशिका,** सिंधीजैन-ग्रन्थमालायां प्रकाशित: **विज्ञप्ति-लेखसंग्रहश्चेति** उल्लेखयोग्यानि वर्तन्ते। एतेषु पुस्तकेषु व्यापार-शासन-परिवार-भूमिक्रयविक्रय-ऋणाभियोगादि-सम्बद्धानि विविधानि पत्राणि सन्ति। एतेषु पत्रेषु कतिचित् पत्राणि पद्यमयानि कतिचित् च गद्यमयानि विद्यन्ते। परन्तु सम्प्रति न खलु इमानि पुस्तकानि सुलभानि न वा सामयिकदृष्ट्या उपयोगीनि सन्ति।

अत: सामयिकदृष्ट्या पत्राणां लेखनस्य आवश्यकतामनुभूय सरलशैल्या प्राञ्जलभाषया च अध्यायेऽस्मिन् कानिचित् पत्राणि लिखित्वा उपन्यस्तानि सन्ति। तथैव बहुविधानाम् आवेदनपत्राणाम् (प्रार्थना-पत्राणाम्) अपि लेखनप्रकारा: प्रदर्शिता: वर्तन्ते। संस्कृते लिखितानां गद्यात्मकानामनुच्छेदानाम् अवबोधनाय पद्यानां च बोधशक्ते: विकासाय केचल गद्यानुच्छेदा: कतिचित् पद्यानि च समावेशितानि सन्ति। संस्कृतभाषा-प्रयोगे व्यवहारे वा संस्कृतवाक्येषु जायमानानाम् अशुद्धीनां संशोधनाय अपि उदाहरणपुरस्सरं कानिचित् वाक्यानि संशोध्य अध्यायेऽस्मिन् उपनिवद्धानि विद्यन्ते। आशास्से ऐतषामत्र समावेशितानां विषयाणाम् अध्ययनेन अभ्यासेन च भवतां संस्कृतभाषाया: व्यावहारिकज्ञाने सौकर्यं सौविध्यञ्च संपत्स्यते। इति।

## 1.3 पत्र-लेखनम् (Letter Writing)

मानवजीवने पत्राणां महत्त्वं सर्वविदितम्। वयं स्वजीवने प्रतिदिनं विविधानां पत्राणां लेखनस्य आवश्यकताम् अनुभवाम:। पारिवारिक-समाचारस्य प्रदानाय, विभिन्नेषु अवसरेषु शुभकामनादिसंदेशानां प्रेषणाय, उपनयन-विवाहादिषु निमन्त्रण-दानाय, मित्र-सहपाठि-सम्बन्धिनां वृत्तस्य आदानाय च प्रायशो वयं पत्रव्यवहारं कुर्म:। न केवलमेतदेव, अपि तु विविधेभ्य: जनेभ्य:, विभिन्नेषु कार्यालयेषु, विविधेषु व्यवसायेषु च अनेकानि प्रयोजनानि समुद्दिश्य वयं विविधप्रकारकाणि आवेदन-पत्राणि लिखाम:। तदेवं पत्रस्य समवेतभावेन द्विविधं स्वरूपं भवति।

(क) वैयक्तिकं पत्रम्।

(ख) कार्यालयीयं/ व्यावसायिकं पत्रम्।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

वैयक्तिकं पत्रं पुनः बहुविधं भवति। तद्यथा-पारिवारिकं पत्रम्, विद्यालय-महाविद्यालय-विश्वविद्यालय-सम्बन्धि पत्रम्, मित्र-सहपाठिसम्बन्धि पत्रम्, निमन्त्रणसम्बन्धि पत्रं चेति। कार्यालयीयं व्यावसायिकं वा पत्रम् आवेदन-पत्रनाम्नाऽपि ज्ञायते।

**वैयक्तिक-पत्रस्य स्वरूपम्**

(क) मांगलिक पदम् ...
(ख) स्थानं ... दिनांकश्च च...
(ग) सम्बोधनम्
(घ) नमस्कार:, अभिवन्दनम्, आशीर्वचनं च
(ङ) कुशलसूचना ...
(च) संन्देश: - ..................................................................
...................................................................................
(छ) उपसंहार: ...
(ज) प्रेषकस्य परिचय:
हस्ताक्षरं च

तदेवं वैयक्तिक-पत्रस्य अष्टौ भागा: अत्र दर्शिता। इदानीं तेषु प्रतिभागं किञ्चिदावश्यकं विचारयाम:।

(क) मांगलिकं पदम् -

- वैयक्तिक-पत्रस्य प्रारम्भे मंगलसूचकं पदमधोलिखितं भवितुमर्हति -
- श्री:
- ओम्
- ॐ नम:, शिवाय/गणेशाय/हनुमते/परमेश्वराय/गुरवे। अत्र स्वाभिरूचेरनुसारं भिन्नमपि किञ्चिदन्यत् पदं प्रयोक्तुं शक्यते। इमानि पदानि पत्रस्य शीर्षकारूपेण लिखितानि भवन्ति।

(ख) स्थानं दिनाङ्क: च-

- शीर्षिकां लिखित्वा पत्रस्य दक्षिणकोणे दिनाङ्क: लेखनीय: भवति। तदनु य: पत्रं लिखति स: दिनाङ्कस्य अधोभागे स्वकीयं पत्रसङ्केतं च लिखति।

(ग) सम्बोधनम्

(घ) अभिवादनम्, आशीर्वचनम्/अभिवन्दनम्, नमस्कार: वा

यं प्रति पत्रं लिखाम: तं प्रति लेखनीयं भवति।

**Stop to Consider**

| यं प्रति पत्रं लिख्यते | सम्बोधनम् | नमस्कार:/अभिवन्दनम्/ अभिवादनम्/आशीर्वचनम् वा |
|---|---|---|
| • मित्रं प्रति | प्रिय वयस्य/प्रिय मित्र! | सस्नेहं नमस्ते |
| • शिष्यं प्रति | प्रिय शिष्य/प्रिय वत्स! | शुभाशिष: |

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

| | | |
|---|---|---|
| • पितरं प्रति | परमपूज्याः पितृचरणाः ! | सादरं प्रणमामि |
| • मातरं प्रति | परमपूज्ये मातः ! | सादरं प्रणामाः, सादरं चरणवन्दनानि |
| • गुरुजनान् प्रति | परमपूज्याः गुरुवर्याः ! | सादरं चरणवन्दनानि, सादरं प्रणामाः |
| • अनुजं प्रति | प्रिय अनुज ! | आशीर्वादाः |
| • भगिनीं प्रति | प्रिये भगिनि ! | सस्नेहं प्रणामाः |
| • अग्रजं प्रति | मान्याः अग्रजमहाभागाः ! | सादरं प्रणचयः |
| • सखीं प्रति | प्रिये सखि ! | नमस्ते |
| • पितृव्यं प्रति | आदरणीयाः पितृव्यमहोदयाः ! | सादरं प्रणामाः |
| • पितामहं प्रति | पूज्याः पितामहाः। | सादरं चरणवन्दनानि |

(ङ) कुशलसूचना –

(I) पत्रस्य प्रारम्भे अधोनिर्दिष्टरूपेण कुशलसूचना क्रियते, यथा–

- अहम् अत्र कुशली/वयम् अत्र कुशलिनः।
- भवान्/भवती/त्वम् अपि सकुशलः सकुशला/सकुशल इति विश्वसिमि/भावयामि/मन्ये/चिन्तयामि।
- अत्र कुशलं/सर्व समीचीनं/शं, तत्रापि अस्तु।
- ईश्वरस्य कृपया अत्र सर्वे कुशलिनः/आशास्से तत्रापि सर्वे कुशलिनः स्युः
- कुशली अहम्/कुशलिनः वयम्/भवतां कुशलतायै ईश्वरं सम्प्रार्थये।

(II) कस्माच्चित् सकाशात् प्राप्तस्य पत्रस्य उत्तरे यत् लिखामः तत् एवंविधं भवितुमर्हति– यथा –

- तव/भवतः/भवत्याः पत्रं प्राप्तम्।
- त्वं/भवान्/भवती बहुकालात् अस्वस्थः/ अस्वस्था इति विज्ञाय दुःखम् अनुभवामि।
- पत्रोत्तरे विलम्बः संजातः तदर्थं क्षमाप्रार्थी अस्मि।
- विविधकार्येषु व्यस्ततावशात् विलम्बेन पत्रोत्तरं लिखामि।
- पत्रं पठित्वा चिन्ता जाता/किमपि निदानाय/समाधानाय लिखामि।
- शुभसन्देशं/शुभकामनां/ वर्धापनापत्रं, प्राप्तवान्/प्राप्तवती।

(च) सन्देशः–

सन्देशे विविधानां समाचाराणां सन्निवेशो भवति। विविधप्रकाराणां वृत्तान्तानाम् आदानं प्रदानं च संजायते। एतद् भवन्तः स्वयमपि लेखितुं शक्नुवन्ति। उदाहरणार्थं कानिचित् पत्राणि अत्र प्रदत्तानि सन्ति।

(छ) उपसंहारः –

पत्रस्य उपसंहारः (समापनम्) निम्नलिखितदिशा कर्तुं शक्यते–

- सर्वेभ्यः प्रणामाः/सर्वेभ्यः परिवारसदस्येभ्यः नमस्काराः।
- अग्रजेभ्यः मे प्रणामः/अनुजेभ्यः शुभाशंसनानि।
- अनुजाय/अग्रजाय प्रणामाः/अनुजायै/अग्रजायै शुभाशीर्वादाः।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

- मातृ–पितृ–चरणेषु मम प्रणामाः निवेदनीयाः।
- प्रियभगिन्यै मे आशीर्वादाः सूचनीयाः।
- पूज्येभ्यः पितामहेभ्यः मम प्रणामाञ्जलिः विज्ञापनीयः।
- यथाशीघ्रं यत्रोत्तरं प्रेषणीयम्।
- अवशेषं पुनः लिखिष्यामि।
- कृपया शीघ्रं पत्तोत्तरं प्रदेयम्/प्रेषयतु/प्रेमयन्तु।
- यथाकालं पत्रेण स्वकुशलवृत्तान्तं सूचयतु/सूचयन्तु।

(ज) प्रेषकस्य परिचयः हस्ताक्षरं च –

पत्रस्य अन्ते अधो भागे दक्षिणकोणे यः पत्रं लिखति, सः स्वपरिचयं लिखति अपि च स्व हस्ताक्षरमपि करोति।

**Stop to Consider**

परिचयः कथं लिख्यते इति जिज्ञासायाम् अधस्तनी तालिका प्रणिधानयोग्या समस्ति–

| यं प्रति पत्र लिखामः | पत्र–प्रेषकस्य परिचयः |
|---|---|
| • अनुजं प्रति | भवतः शुभाकड्क्षी हस्ताक्षरम् (ह.) ... |
| • मित्रं प्रति | भवदीयः प्रियमित्रम्/प्रियसखा/भवदीया प्रियसखी (ह.) ... |
| • अग्रजं प्रति | भवतः अनुजः/ अनुजा/ (ह.) ... |
| • पितरं प्रति/मातरं प्रति | भवदीयः पुत्रः/भवदात्मजः/भवदात्मजा/भवदीया पुत्री (ह.) |
| • गरुजनान् प्रति/गुरुं प्रति | भवदाज्ञाकारी शिष्यः/भवदाज्ञाकारिणी शिष्या (ह.) ... |
| • पितामहं/पितृव्यं प्रति | भवदाशिषाकांक्षी/भवत्स्नेहाकांक्षी (ह.) ... |

उदाहरणरूपेण अत्र कतिचन पत्रोदाहरणानि दीयन्ते। भवन्तः तानि सम्यक् परिशीलयन्तु।

### 1.3.1 परिवार-सम्बन्धीनि पत्राणि

**पितंर प्रति पुत्रस्य पत्रम्**

॥ श्रीः ॥

दिनांकः : 16–2–2–12
125, कृष्ण–पुरम्
नव–देहली

पूज्याः पितृचरणाः!

सादरं प्रणामाञ्जलयः

भवत्कृपया अहम् अत्र कुशली अस्मि। आशास्से च भवन्तोऽपि कुशलिनः स्युः। सूचनीयम् इदं वर्तते यत् मईमासस्य विंशतितारिकातः मम ग्रीष्मावकाशः भविता। पुनः जुलाईमासस्य अष्टमे दिनाङ्के महाविद्यालयः उद्घटिष्यते। यद्यपि अवकाशकाले सर्वेषामपि छात्राणां गृहं गन्तुं समीहा भवति। किन्तु मया विचाहितमासीत् यत् ग्रीष्मावकाशे अत्रैव

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

उषित्वा अध्ययनं करवाणि। यतो हि आगामिन्याः कक्षायाः पाठ्यक्रमः अतीव कठिनो विद्यते। किन्तु अत्र एका महती बाधा इयं वर्तते यत् देहल्यां तदानीं असहनीया उष्णता भवति। अनेन संकटेन अत्राहं स्थातुं न शक्नोमि। अतः गृहे एव सम्पूर्णस्य ग्रीष्मावकाशस्य प्रत्येकं क्षणम् अध्ययने यापसिष्यामि इत निश्चितं मया।

अत एव अहम् इतः एकविंशतितारिकायां प्रस्थास्यामि द्वाविंशे दिनाङ्के च गृहं प्राप्स्यामि। सूचनायै पत्रमिदं प्रेषयामि। सर्वेभ्यः ज्येष्ठेभ्यः मम प्रणामाः अनुजाय च शुभाशिषः विज्ञापनीयाः।

भवदात्मजः
सिद्धेश शर्मा

## अनुजं प्रति अग्रजस्य पत्रम्

**श्री गणेशाय नमः**

दिनाङ्कः 26-3-2013
357, गोविन्दनगरम्
मुम्बई, महाराष्ट्रम्

आदरणीयाः अग्रजमहोदयाः!

सादरं प्रणामाः

भवदीयं प्रेरणादायकं पत्रम् अधिगतम्। एतत् पठित्वा मया बहुप्रेरणा प्राप्ता। समाचारपत्रेषु विज्ञापनानि द्रष्टुं तदनुसारं च आवेदनं कर्तुम् अहं भवता आदिष्ट आसम्।

भवदाज्ञानुसारं मया गते मासे एकस्मिन् संस्थाने आवेदनपत्रं प्रस्तुतम्। भगवतः कृपया अहं तत्र साक्षात्काराय आहूतः तथा साक्षात्कारे साफल्यम् अरि लब्धवान्।

अद्यैव नियुक्तिपत्रं मया लब्धम्। एतत् नियुक्तिपत्रं दृष्ट्वा मनः अतीव प्रसन्नम् अभवत्। सर्वप्रथमं भवन्तम् एव सूचयितुं धन्यवादान् च दातुम् अहम् ऐच्छम्। अतः भवत्कृते पत्रं लिखामि।

एतत्सर्वं भवताम् एव प्रेरणायाः फलं वर्तते। यदि भवता प्रेरणा दत्ता न स्यात् तर्हि मया तु कथमपि आवेदनपत्रं न दत्तम् अभविष्यत् तथा च एतादृशं महत् साफल्यम् अपि न प्राप्तम् अभविष्यत्। भवादृशं भ्रातरं प्राप्य अहम् आत्मानं गौरवान्वितं मन्ये। अन्यत् सर्वं गृहवृत्तं समीचीनम्। शेषं पुनः लेखिष्यामि।

भवत्स्नेहाकांक्षी अनुजः
अशोक भागवती।

## पौत्रं प्रति पितामहस्य पत्रम्

**॥ श्रीः ॥**

दिनाङ्कः 28-1-2013
प्रशस्तिमार्गः, गोस्वामिसदनम्, तेजपुरम्

प्रिय कोशिक।

भूयांसि शुभाशीर्वचनानि

अहं परमेश्वरस्य कृपया सकुशलः अस्मि। तव आरोग्यस्य मंगलमयजीवनस्य च

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

शुभकामनां करोमि। त्वम् एक: मेधावी योग्यश्च छात्रोऽसि। त्वया बाल्यकालादेव प्रत्येकं कक्षायां प्रथमा श्रेणी लब्धा। अत एव अहं त्वयि बहु आशान्वित:। सर्वेषामपि जनानां स्वजीवनस्य किमपि नियतम् उद्देश्यं भवति। निश्चितम् उद्देश्यं विना कोऽपि स्वीये जीवने साफल्यं न लभते। अत एव प्रायेण सर्वे एव छात्रा: छात्र–जीवने एव उद्देश्यं निर्धारयन्ति। तेषु कश्चन अभियन्ता भवितुम् इच्छति, कश्चित् चिकित्सक: भवितुं वाञ्छति, कोऽपि पत्रकार: भवितुं समीहते। कस्यचित् सर्वकारीय: अधिकारी भवितुं समीहा जायते, कस्यचित् नेता भूत्वा राष्ट्रसेवां विधातुम् इच्छा भवति। केनापि शिक्षा–क्षेत्रे एव सेवा विधानुमिष्यते। केनचित् च स्वतन्त्ररूपेण लेखनादिकं कुर्वता जीवनयापनस्य उद्देश्यं निर्धायते।

अत्राहं ज्ञातामिच्छामि यत् त्वया जीवनस्य किमुद्देश्यं निश्चितमस्ति। अध्यनानन्तरं किं कर्तु तव योजना विद्यते। एतत् सर्वं विलिख्य शीघ्रं पत्रोत्तरं प्रेषणीयम्। अत्रत्या: सर्वे जना: तव अभ्युन्नतिं कामयन्ते शुभाशिषश्च सूचयन्ति।

तव पितामह:
गङ्गाधर गोस्वामी।

**पितामहं प्रति पौत्रस्य पत्रम्**

दिनाङ्क: 10–2–2013
कैलाशनगरम्
कर्णपुरम्, उत्तर प्रदेश:

परमपूज्येषु पितामहमहाभागेषु

शतश: प्रणतिराशय:

भवदीयं कृपापत्रं प्राप्तम्। पत्रं पठित्वा अहं नितरां प्रमोदम् अनुभवामि।

स्वकीये पत्रे भवन्त: मां पृष्ठवन्त: सन्ति ''त्वया जीवनस्य किम् उद्देश्यं निश्चितं कृतं वर्तते ? अध्ययनानन्तरं किं कर्तुं तव योजना वर्तते ?'' इति।

अस्मिन् विषये मम य: विचार: अस्ति तमहमत्र उपस्थापयामि। मम छात्रावासे ये मित्राणि सन्ति तेषु कश्चन अध्यापक: भवितुम् इच्छति, कश्चित् चिकित्सक:, कोऽपि पत्रकार:, कोऽपि चित्रकार: भवितुं वाञ्छति। कोऽपि नेता भूत्वा समाज–सेवां च विधातुं कामयते।

अहं तुं प्रशासनिकसेवायां सम्मिलितो भूत्वा देशस्य सेवाम् उपकारञ्च कर्तुमभिलषामि। यदाऽहं हाइस्कूल–कक्षायाम् आसम् तदानीमेव मम हृदये अयं विचार: समायात: यत् ''अवसरे प्राप्ते अहं 'जिलाधिकारी' पदं प्राप्य निष्पक्ष–भावेन देशस्य लोकानाञ्च सेवां विधास्यामि'' इति।

अस्य कृते आई.ए.एस. इति प्रतियोगितायाम् उत्तीर्णता प्राप्तव्या भवति। अत एव आगामिनि वर्षे अहमस्यां प्रतियोगितायां भागं ग्रहीष्यामि। अस्यां दिशि भवतां मार्गदर्शनं वाञ्छामि। यतो हि भवद्भि: पी.सी.एस. इति प्रशासकीया परीक्षा समुत्तीर्णा वर्तते। अत: भवन्त: स्वीयेन अनुभवेन मम र्मादर्शनं साहाय्यं च कुर्वन्तु इति मम निवेदनम्। यथाकालं पुन: लेखिष्यामि।

भावत्क: पौत्र:
कौशिक भट्टाचार्य:।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

## भ्रातु ज्येष्ठभगिनीं प्रति पत्रम्

दिनाङ्कः 5-3-2013
आर.सी.सी. 2 छात्रावासः
गौहाटी विश्वविद्यालयः गुवाहाटी।

आदरणीये भगिनि निर्मले!

सादरं प्रणतिः

कुशलपूर्वकं तिष्ठन्नहं तव कुशलतायै भगवतीं कामाख्यां प्रार्थये। आरम्भे यदाऽहम् अत्र आगतवान् तदा मम मनः न लगति स्म। यतोहि छात्रावासे न कोऽपि छात्रः मम परिचितः आसीत्। किन्तु शनैः शनैः छात्रैः अध्यापकैः सहपरिचयेन मनसि परिवर्तनं जातम्। इदानीं तु काऽपि तादृशी समस्या नास्ति।

अहं आर.सी.सी.2 छात्रावासे निवसामि। मम प्रकोष्ठसंख्या अष्टादश वर्तते। छात्रावासस्य एकस्मिन् कोणे मम प्रकोष्ठस्य स्थितिः। प्रकोष्ठष्य गवाक्षेभ्यः छात्रावासक्षेत्रे रोपितानां वृक्षलतापुष्पदीनां छटा स्पष्टरूपेण द्रष्टुं शक्यते।

भगिनि! कदाचित् भवती अपि गुवाहाटीम् आगच्छतु। अत्र बहूनि दर्शनीयानि स्थलानि सन्ति। यथा कामाख्यामन्दिरम्, उमानन्दः, श्रीगणेश-मन्दिरम्, कलाक्षेत्रम्, जन्तुशाला, संग्रहालयश्चेति प्रसिद्धानि दर्सनीयानि स्थानानि सन्ति। पूर्वेत्तरप्रान्तेषु अग्रगण्यस्य गौहाटी-विश्वविद्यालयस्य महिमा अवर्णनीयः अस्ति। परिवारस्य अन्येभ्यः ज्येष्ठवर्गेभ्यः सादरं प्राणामाः कनिष्ठवर्गेभ्यश्च सस्नेहं शुभाशिषः वाच्याः।

दर्शनोत्सुकः तवानुजः
ज्ञानेश मेधिः

### Check Your Progress

अधोलिखितां तालिकां पूरयन्तु-

| यं प्रति पत्रं लिख्यते | सम्बोधनम् | नमस्कारः/अभिवन्दनम्/आशीर्वादाः च |
|---|---|---|
| अग्रजं प्रति | .............. | |
| पितरं प्रति | .............. | |
| अनुजं प्रति | .............. | |
| मातरं प्रति | .............. | |
| भगिनीं प्रति | .............. | |
| गुरुं प्रति | .............. | |
| पितामहं प्रति | .............. | |
| पितृव्यं प्रति | .............. | |
| सखीं प्रति | .............. | |
| मित्रं प्रति | .............. | |

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

## मित्र-सहपाठि-सम्बन्धीनि पत्राणि

### परीक्षाविषयकं पत्रम्

॥ ॐ ॥

दिनाङ्कः 2-2-2013
प्लाट सं45, मार्गः-3
देवी कँलोनी, जोरहाट

प्रिय मित्र प्रमोद!

सस्नेहं शुभाशिषः

अत्राऽहं कुशली एव। त्वमपि सकुशलः इति भावयामि। मन्ये तव परीक्षा सम्प्रति समाप्ता स्यात्। परीक्षा कथं जाता? कानि कानि प्रश्नपत्राणि सम्यक् समाहितान, केषां च प्रश्नानां समाधाने त्रुटिरजायत, के के च प्रश्नाः अनुत्तरिता एव परित्यक्ताः? परीक्षाफले च तव कीदृशः विश्वास? इदं सर्वं ज्ञातुमिच्छामि। पद्रद्वारा शीघ्रं सूचनीयम्। विलम्बो न विधेयः। पत्रोत्तरस्य प्रतीक्षायाम्।

तव अभ्युदयाकांक्षी
अलोक कुमारः

### बिहूत्सवे अगमनाय आमन्त्रणम्

॥ श्रीः ॥

दिनाङ्कः 11-12-2013
तरूण नगरम्,
गुवाहाटी

सम्मैनार्हाः सुहृद्वर्य्याः!

सविनयं नमस्करोमि

सप्ताहद्वयात् प्राक् प्रषितं त्वदीयं पत्रं समाद्य हस्तगतमभवत्। त्वदीयं तव परिवारस्य च कुशलवृत्तं ज्ञात्वा प्रसन्नता जाता।

आगामिनि बिहूत्सवे त्वं गुवाहाटीम् आगमिष्यति इति विदित्वा प्रफुल्लितं में मनः। बहोः कालात् आवयोः मेलनं न जातम्। तेन त्वां द्रष्टुं मम महती उत्कण्ठा अस्ति। इदानीं तवात्र आगमनेन, प्रेमालापेन च मम महान् प्रमोदः भविष्यति। मम परिवारस्यापि जनाः प्रमुदिताः भविष्यन्ति। बिहूत्सवे अन्येऽपि केचन सुहृदः सम्बन्धिनश्च मम गृहम् आगच्छन्ति। अतः तौः सह अपि तव साक्षात्कारः सुखप्रदो भविष्यति।

अत्र वयं सर्वे एव तवागमनं प्रतीक्षामाणाः स्मः। अस्मिन् कार्यक्रमे परिवर्तनं न कर्तव्यम्। यदैव अवकाशो भवेत् तदैव प्रस्थानं विधातव्यम्।

तव शुभागमनप्रतीक्षारतः
परेश चन्द्र दासः

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

**पुस्तकानाम् अनयनाय अनुरोधपत्रम्**

**॥ श्री गुरवे नमः ॥**

दिनाङ्कः 7-5-2013
शोध-छात्रावासः
गौहाटी-विश्वविद्यालयः
गुवाहाटी।

प्रियवर दिनेश!

सस्नेहं-प्रणामाः

सखेदं निवेदयामि यत् गृहात् आगमनकाले त्वरायां मया अनेकानि पुस्तकानि गृहे एव परित्यक्तानि। तेनात्र अध्ययने महती बाधा जायते। अतः त्वं मम गृहं गत्वा ततश्च मम पुस्तकानि गृहीत्वा अत्र आगमिष्यसि। पुस्तकानि मम गृहस्य अध्ययनकक्षे एव एकत्र काष्ठफलेक स्थापितानि सन्ति। कृपया इदं कथमपि न विस्तर्तव्यम्।

त्वदीयः मित्रम्
प्रणव डेका

**स्वास्थ्यविषयकं पत्रम्**

**॥ परमात्मने नमः ॥**

दिनाङ्कः 22-3-2013
विष्णुपथः, नलबारी।

प्रिय सखे!

सस्नेहं शुभाशंसनानि

कस्यचित् मित्रस्य मुखात् इदं ज्ञात्वा मम महती चिन्ता जाता यत् तव स्वास्थ्यं सम्प्रति समीचीनं नास्ति। अनेन च कारणेन तव दुर्बलता अपि प्रतिदिनं वर्धमाना वर्तते।

अस्वस्थतां गतस्य तव मासाधिकः कालः व्यतीतः परं त्वया अद्यावधि तस्य सूचना मम सविधे न प्रेषिता इत दुःखस्य आश्चर्यस्यं च विषयः अस्ति। त्वं खलु इतो बहुदूरे निवससि। तत्र कस्यापि गमने आगमने वा महान् व्ययः संजायते। अस्वास्थ्यदशायां यथाशीघ्रं सूचनाप्रदानं परमावश्यकं कर्तव्यम्। इदं त्वया कदाचिदपि न विस्मरणीयम्।

ममेदं पत्रं लब्ध्वा तत्कालं त्वया उत्तरं प्रेषणीयं स्वास्थ्यस्य च विस्तृतं विवरणं लेखनीयम्। अहं महता औत्सुक्येन तव उत्तरस्य प्रतीक्षां करिष्यामि। ईश्वरकृपया ते शुभं भूयात्।

तव मङ्गलाकांक्षी
कमल तालुकदारः

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

**Check Your Progress**

रिक्तस्थानानि पूरयन्तु-

| पत्रस्य प्रारम्भे | पत्रस्य उत्तरे |
|---|---|
| (क) तत्र सर्व ........ | (क) पत्रं पठित्वा .......... |
| (ख) अहम् अत्र ....... | (ख) वर्धापनपत्रं ........... |
| (ग) भवानम अपि ........ इति भावयामि | (ग) भवत: परीक्षापरिणामं पठित्वा ..........। |
| (घ) ईश्वरस्य कृपया ......... | (घ) पत्रस्य उत्तरे ..........। |
| (ङ) अत्र कुशलं .......... | (ङ) ........... पत्रं प्राप्तम्। |

### 1.3.3 निमन्त्रण-सम्बन्धीनि पत्राणि

**सरस्वतीपूजाया: निमन्त्रणम्**

**॥ श्रीश्री सरस्वत्यै नम: ॥**

दिनाङ्क: 18-2-2012
संस्कृत-विभाग:
गौहाटी-विश्वविद्यालय

मान्यवर महोदय!

महता हर्षेण इदं विनिवेद्यते यत् पूर्ववर्षाणीव अस्मिन् वर्षे अपि गौहाटी-विश्वविद्यालयीय-संस्कृत-विभोग 25-02-12 तमे दिनाङ्के पूर्वाह्ने अष्टवादने सरस्वती-पूजाया: समारोह: आयोजितो वर्तते। पूजानन्तरम् एका सभा अपि समायोजिता भविष्यति यत्र बहूनां विख्यातविदुषां संस्कृत-शिक्षाविषयम् अवलम्ब्य भाषणानि भविष्यन्ति।

अस्मिन अवसेर सुभागमनेन दर्शनदानेन च सर्वे अपि वयं विद्यार्थिन: अनुग्रह्या इति सविनयं विनिवेदयते-

पूजासमिते: सचिव:
विश्वजित भट्टाचार्य:

**प्रतिष्ठादिवसस्य/स्थापनादिवसस्य निमन्त्रणम्**

दिनाङ्क: 10-2-2013
दूरोन्मुक्त-शिक्षा-प्रतिष्ठानम्,
गौहाटी-विश्वविद्यालय:

महामान्या: !

सहर्ष विनिवेद्यते यत् गौहाटी-विश्वविद्यालयीय-दूरोन्मुक्त-शिक्षा-प्रतिष्ठानस्य प्रतिष्ठादिवससमारोह: आगामिनि 16-02-13 तमे दिनांके शुक्रवासरे प्रतिष्ठानस्य सभागारे महता समुल्लासेन समायोजितो विद्यते। प्रतिष्ठानस्य निर्देशका: समारोहस्य आध्यक्षत्वं निर्वक्ष्यन्ति। गौहाटी विश्वविद्यालयस्य मान्या: उपाचार्या: मुख्यातिथिरूपेण समारोहमण्डपं मण्डयिष्यन्ति। अन्ये नैके गणमान्या: मनीषिण: समारोहं सम्बोधयिष्यन्ति।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

अवसरेऽस्मिन् भवतां समागमेन समारोहोऽयं सर्वथा गौरवान्वितो भविष्यति। अतः यथासमयम् आगत्य समारोहस्य शोभा संवर्द्धनीयेति पुनः पुनः अभ्यर्थये।

समारोहस्य संयोजकः
उत्पल गोस्वामी

## कन्याविवाहोत्सवे निमन्त्रणम्

**॥ श्री श्री प्रजापतये नमः ॥**

दिनाङ्कः 05-1-2013
निर्मला-सदनम्
रंगिया

सम्माननीयाः बन्धवः,

प्रेयांसः सुहृज्जनाश्च

परमहर्षस्यायं विषयाः अस्ति यत् परमेश्वरस्य कृपया मम कनीयस्याः कन्यायाः/ भगिन्याः विवाहः गुवाहाटी निवासिना ऐकन कुलीनेन, लब्धजीविकेन च वरेण सह निश्चितः समस्ति। विवाहतिथिः आश्विनमासे शुक्लपक्षस्य दशमी तदनुसारं (16-10-13) दिनांकः वर्तते।

एतस्मिन् मङ्गलमये समये यथाकालं समागत्य स्वकीयैः शुभाशीर्वचनैः कन्या वरश्च अनुग्रहीतव्यौ मण्डपस्य च शोभा वर्द्धनीय इति भवत्सेवायां विनयपूर्णा मे अभ्यर्थना।

प्रणतिपूर्वकम्
भवदीयः
गौतम अधिकारी

## राष्ट्रिय-सङ्गोष्ठयाः निमन्त्रणम्

दिनाङ्कः 04-2-2013
संस्कृत-विभागः
गौहाटी-विश्वविद्यालयः
गुवाहाटी

मान्य-महानुभावाः,

सहर्ष संसूच्यते यत् गौहाटी-विश्वविद्यालयस्य संस्कृत-विभागेन "पूर्वोत्तर संस्कृति-साहित्ययोः रामायण-महाभारतयोः प्रभावः" इति विषयमधिकृत्व 12-04-13 दिनाङ्कतः 13-04-13 दिनाङ्कपर्यन्तं द्विदिवसीया राष्ट्रिय-सङ्गोष्ठी समायोजिता वर्तते। गौवाटी-विश्वविद्यालयस्य माननीयाः उपाचार्यमहाभागाः संगोष्ठ्या उद्घाटनं करिष्यन्ति। नवदेहलीस्थ-राष्ट्रिय-संस्कृत-संस्थानस्य उपाचार्यमहोदयाः उद्घाटनसमारोहे मुख्य-भाषणमुपस्थापयिष्यन्ति। त्रिपुरा-विश्वविद्यालयस्य संस्कृत-विभागाध्यक्षाः मुख्यातिथिरूपेण उद्घाटनसत्रस्य शोभां संवर्द्धयिष्यन्ति।

अस्मिन् अवसरे भवताम् उपस्थितिं सादरं सबहुमानं च संप्रार्थयते।

भवदीयः
आशुतोष चक्रवर्ती

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

**उत्सवे अनुपस्थित्यै क्षमायाचना**

दिनाङ्कः 29-6-2012
संस्कृत-विभागः
दरंग-महाविद्यालः, तेजपुरम्

सम्माननीयाः अध्यक्षमहोदयाः,

भयांसि नमांसि

अहं भवतः महाविद्यालयस्य वार्षिकोत्सवे सम्मिलितो भवितुं न अशक्नवम् इति महतः दुःखस्य विषयः अस्ति। परन्तु विवशता एव अत्र प्रधानं कारणं न तु मदीया उपेक्षा, प्रमादः, अविनयो वा। एकस्याः घटनायाः अकस्मात् उपस्थानात् गृहे मम उपस्थितिः न केवलम् आवश्यकी अपि तु अपरिहार्या संजाता। तस्मादेव भवदुत्सवे उपस्थातुं कृतनिश्चयोऽपि उपस्थातुं न प्राभवम्। एतदर्थं भवता अन्यथा न कल्पनीयं, क्षमाप्रदानेन चाहं अनुकम्पनीयः। घटनायाः विस्तृतं विवरणं पश्चात् सूचयिष्यामि।

भवत्स्नेहाकांक्षी
मृदुल उपाध्यायः

**Check Your Progress**

अधस्तनं पत्रं पठित्वा पत्रस्य शीर्षकं सम्बोधनं समाप्त्यादिकं विचारयन्तु-

.................. ..................
.................. ..................
..................

इदं विज्ञाय भवत्याः परमः प्रमोदः भविष्यति यत् अस्य महिला-महाविद्यालयस्य सर्वाभिः कन्याभिः सम्भूव एकस्य महिला-संस्कृत-सम्मेलनस्य आयोजनं कृतमस्ति। आगामि-मार्च-मासस्य द्वितीयसप्ताहे इदं सम्मेलनं महाविद्यालयस्यैव प्राङ्गणे संपत्स्यते। एतद्विषयकं विस्तृतं विवरणं यथाकालं सूचयिष्यामः। परन्तु सम्मेलनस्य साफल्यं भवत्याः सहयोगस्य उपरि एव निर्भरं वर्तते।

अतः महिलानां गौरवावहे अस्मिन् समारोहे भवती अस्माकं मार्गदर्शनं करोतु तथा च सर्वविध-सहयोग प्रदानेन सम्मेलनं साफल्यमण्डितं करोतु इति अस्माकं विनम्र-निवेदनम्।

भवदीयाः एव
....................

### 1.3.4 आवेदन- ( प्रार्थना ) - पत्र-लेखनम् (Application Writing)

- भवन्तः विविधानि व्यक्तिगतपत्राणि लेखितं ज्ञातवन्तः। कतिचित् पत्राणि व्यावसायकानि कार्यालयीयानि च भवन्ति। तद्यथा-
- प्रस्तकप्रेषणार्थं/पुस्तकक्रयणार्थं पुस्तकविक्रेतारं/पुस्तकप्रकाशकं प्रति।
- पत्रिकायाः ग्राहकतायै सम्पादकं प्रति।
- विश्वविद्यालये/महाविद्यालये प्रवेशार्थं अध्यक्षं/विभागाध्यक्षं/उपाचार्यं प्रति।
- छात्रावासे स्थानं प्राप्तुं छात्रावासस्य अधीक्षकं प्रति।
- अवकाशग्रहणाय निदेशकं/अध्यक्षं/विभागाध्यक्षं पंजीयकं/अधिकारिणं प्रति।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

- नगरस्य दुरवस्थापरिहाराय/समाचारस्य प्रकाशनाय च समाचारपत्रस्य सम्पादकं प्रति।
- शुल्कमुक्तये संस्थानस्य पदाधिकारिणं प्रति।
- प्रतियोगिता:/समारोहस्य/कार्यक्रमस्य आयोजनाय अनुमतिग्रहणाय अनुष्ठानस्य प्रतिष्ठानस्य वा अधिकारिणं प्रति।
- चरित्रप्रमाणपत्रस्य/त्यागप्रमाणपत्रस्य प्राप्त्यै प्रार्थनापत्रम्।

**पत्र-प्रारूपम्**

(क) सकाशात्/द्वारा,
............................
............................
............................ — पत्रलेखकस्य सङ्केत:

(ख) सविधे/सेवायाम्
............................
............................
............................ — पत्र-स्वीकर्तु: सङ्केत:

(ग) विषय:.................. — विषयस्य नाम/पत्रस्य विषय:

(घ) ............................ — सम्बोधनम्

(ङ) ........................................
........................................
........................................ — पत्रस्य प्रतिपाद्य - विषय:

(च) ..................... उपसंहार

(छ) .................. हस्ताक्षरं पदं च

(ज) ........................ स्थानम्, दिनांक:

तदेवं व्यावसायिकपत्राणि कार्यालयीयानि वा पत्राणि अष्टसु विभागेषु विभक्तानि भवन्ति। अधुना प्रातिभागं विचारयन्तु-

(क) पत्रस्यादौ उपरितमभागे पत्रलेखकस्य सङ्केत: लिख्यते तस्य पदनिर्देश: च क्रियते।

(ख) पत्रलेखकस्य सङ्केतस्य अधोभागे पत्रस्वीकर्तु: सङ्केत: तस्य पदोल्लेख: च करणीय: भवति। स्वीकर्तु: नामलेखनम् अनिवार्यं नास्ति।

(ग) स्वीकर्तु: सङ्केतस्य अधोभागे एकवाक्येन लिख्यमानस्य पत्रस्य विषय: लेखितव्य: भवति।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

(घ) पत्रस्वीकर्तुः पदस्य उल्लेखं विधाय तस्य सम्बोधनं क्रियते। यथा—

- मान्याः निदेशकमहोदयाः,
- आदरणीयाः मंत्रिमहाभागाः,
- माननीयाः सम्पादकमहाशयाः,
- महामान्याः महामहिमराज्यपालमहोदयाः/महामहिम-राष्ट्रपतिमहोदयाः,
- मान्याः विभागाध्यक्षमहोदयाः,
- माननीयाः पंजीयक-/उपाचार्य-/महोदयाः,

(ङ) विषयविभागे विषयस्य उपस्थापनं भवति। अत्र कुशलवृत्तान्तादिकं न लिख्यते।

(च) उपसंहारः इति प्रविभागे साधारण्येन भवदीयः, भवदीया, भवत्विश्वास-पात्रम्, भवदाज्ञाकारी इत्यादिपदानि प्रयुज्यन्ते।

(ज) अत्र पत्रलेखकस्य हस्ताक्षरेण सह तस्य पदनिर्देशः भवति।

(झ) पत्रस्य अधः वामभागे स्थाननिर्देशः क्रियते तथा च पत्रलेखनस्य/पत्रप्रेषणस्य दिनाङ्कः लिख्यते।

- उदाहरणार्थ निम्नलिखितं पत्रं पश्यन्तु-

सकाशात्
श्री राजीव कुमार शर्मा
विभागीयः छात्रः
संस्कृत-विभागः, गौहाटी-विश्वविद्यालयः
गुवाहाटी।

सेवायाम्,
संस्कृतविभागाध्यक्षः/संस्कृतविभागाध्यक्षा
गौहाटी-विश्वविद्यालयः
गुवाहाटी

विषयः - अवकाशार्थं प्रार्थना-पत्रम्।

मान्याः विभागाध्यक्षमहोदयाः,

अहं संस्कृतविभागस्य द्वितीय-षाण्मासिकस्य छात्रोऽस्मि। मम गृहे भगिन्याः विवाहः 16-05-13 दिनाङ्के सुनिश्चितोऽस्ति। तस्मिन् अवसरे समागतानाम् अतिथीनां सम्बन्धिनां च उचितनिवासव्यवस्थादिकं कर्तुं कार्यजातं च विधातुं मम उपस्थितिः गृहे अत्यन्तमावश्यकी विद्यते।

अतः अहं भवन्तं/भवतीं सादरं प्रार्थये यत् भवता/भवत्या विवाहे उपस्थातुं तत्र च पितुः साहाय्यं विधातुं दिनत्रयस्य (15-05-2013 दिनांकतः 17-05-2013 दिनांक यावत्) अवकाशं प्रदाय अहम् अनुग्रहीतव्यः।

| | |
|---|---|
| गुवाहाटी, | भवदाज्ञाकारी छात्रः |
| 12-05-2013 | श्री राजीव कुमार शर्मा |

- अधुना भवताम् अभ्यासाय कानिचित् पत्राणि अत्र प्रदीयन्ते। अत्रोपन्यस्तानि पत्राणि पठन्तु तथा च स्वयं तादृशानि पत्राणि लेखितुम् अभ्यासं कुर्वन्तु।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

## शुल्कमुक्तये प्रार्थनापत्रम्

मान्या: निदेशकमहोदया:,

...............................

सविनयं निवेदयितुमिच्छामि यत् अहं भवतां प्रतिष्ठाने संस्कृते स्नातकोत्तर–द्वितीय–षाण्मासिके अध्ययनं करोमि। मम आर्थकी स्थिति: समीचीना नास्ति। मदीये गृहे किञ्चित् कृषिकार्यं भवति, तेन च कथञ्चित् जीविका–निर्वाह: भवति। कश्चिदपि जन: सेवायां नास्ति। अत: अहं परीक्षा–शुल्कराशे: प्रदाने सर्वथा असमर्थोऽस्मि।

अत भवत: प्रति मदीया करबद्धा प्रार्थना वर्तते यत् भवद्भि: मम दयनीयाम् आर्थिकस्थितिं विलोक्य परीक्षाया: शुल्कमुक्ति: विधातष्या, येन परीक्षाप्रदाने मम कोऽपि अवरोध: न स्यात्।

अस्या: महत्या: कृपाया: कृते आजीवनं भवतां कृतज्ञ: स्थास्यामि।

भवदीय: आज्ञाकारी छात्र:

.................... ..........................

....................

## चरित्रप्रमाणपत्रस्य प्राप्त्यै आवेदनपत्रम्

माननीया: अध्यक्षमहाभागा:,

........................

विनयपूर्वकं विनिवेदनमस्ति यत् विगतवर्षे मया भवत: एव महाविद्यालयात् स्नातक–परीक्षा प्रथमश्रेण्यां समुत्तीर्णा आसीत्। एकस्मिन् विद्यालये कानिचित् शिक्षकपदानि रिक्तानि सन्ति। रिक्तपदानां पूर्तये विज्ञापनमपि सञ्ज्ञातमस्ति। तत्र आवेदनं कर्तुं मम सविधे सर्वविधा अर्हता वर्तते। किन्तु अध्यक्षेण प्रमाणितं प्रदत्तं च एकं चरित्रप्रमाण–पत्रं तत्र अपेक्ष्यते। तद् विना कथमपि नियुक्ति: न सम्भवति।

अत: मया सविनयं निवेदनं क्रियते यत् भवन्त: मम नियुक्त्यै शुभाशिय: प्रदाय चरित्रप्रमाणपत्रप्रदानेन माम् अनुगृह्णन्तु।

भवदीय: विश्वासपात्रम्

............................

........................

........................

## वाद–विवाद–प्रतियोगितायै अनुमतिग्रहणार्थं प्रार्थनापत्रम्

आदरणीया: विभागाध्यक्षमहोदया:,

...........................................

प्रणतिपुरस्सरं निवेदनमिदमस्ति यत् वयं संस्कृतविभागीया: छात्रा: अस्मिन् वर्षे ग्रीष्मावकाशे एकां राज्यस्तरीयां वाद–विवाद–प्रतियोगिताम् आयोजयितुम् इच्छाम:। अस्यो

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

प्रतियोगितायाम् असमप्रदेशस्य स्नातक-श्रेण्या: स्नातकोत्तर-श्रेण्याश्च छात्रा:छात्र्यश्च भागं ग्रहीष्यन्ति। इयं प्रतियोगिता ग्रीष्मावकाशे आयोजयिष्यते, तस्मात् अस्माकं श्रेणीक्षतिरपि न भविष्यति। प्रतियोगिताया: आयोजने संभावितस्य व्यवस्यापि व्यवस्था अस्माभि: करिष्यते। केचन संस्कृतानुरागिण: आर्थिकं साहाय्यं कर्तुं समाश्वासितवन्त: सन्ति। प्रतियोगिताया: आयोजनं संस्कृतविभागे एव कर्तुमभिलषाम:। अत: भवतां/भवतीनाम् अनुमति: अत्यावश्यकी विद्यते। सहैव प्रतियोगितायां निर्णायकत्वेन कतिपयानां तत्रभवतां विभागीयाध्यापकानामपि सहयोग: मार्गदर्शनं च अपेक्ष्यते।

अत: भवन्त:/भवत्य: साग्रहं निवेद्यन्ते यत् अस्या: प्रतियोगिताया: आयोजनाय अनुमतिं प्रदाय मार्गदर्शनं च विधाय वयमनुग्राह्या:।

भवदाज्ञाकारिण: छात्रा:

................ संस्कृत-विभाग:

................ गौहाटी-विश्वविद्यालय:

## अनुपस्थित्यै प्रार्थनापत्रम्

मान्या: अध्यक्षमहाशया:

....................

सविनयं निवेदयितुमिच्छामि यत् अहं गतदिवसात् ज्वरपीडित: शय्याग्रस्तोऽस्मि। बलवती शिरोवेदना च सर्वकालं मां व्यथयति। दिनद्वयं सर्वथा विश्राम: करणीय: इति चिकित्सकस्य परामर्श:। अत: अहम् आगामिदिनद्वयं महाविद्यालयम् अगन्तुम् असमर्थोऽस्मि। मम अनुपस्थितिं मर्षयित्वा दिनद्वयस्य अवकाशं प्रदाय मामनुग्रहीष्यन्तीति प्रार्थयते-

भवदाज्ञाकारी छात्र:

..........................

## समाचारस्य प्रकाशनार्थं सम्पादकाय आवेदनपत्रम्

मान्या: सम्पादकमहोदया:,

............................

अनेन प्रार्थनापत्रेण सह एक: समाचार: भवतां सम्मानितायां "सम्भाषण-सन्देश:" इति नामधेयायां मासिकपत्रिकायां प्रकाशनार्थं प्रेष्यमाण: अस्ति। कृपया इमं समाचारं पत्रिकाया: आगामिनि अङ्के प्रकाश्य अनुगृह्यताम्।

भवदीय:

..................... ...................

.....................

### समाचार:

नवदेहलीस्थ-राष्ट्रिय-संस्कृत-संस्थानस्य गौहाटी-विश्वविद्यालयीय-संस्कृत-विभागस्य च संयुक्ततत्त्वावधाने "पूर्वोत्तर-प्रान्तीयभाषा-साहित्येषु पौराणिक: प्रभाव:"

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

इति विषयमधिकृत्य ऐषमो 2013 वर्षस्य मार्चमासस्य 09–10 दिनाङ्कयोः द्विदिवसीया राष्ट्रीया सङ्गोष्ठी समायोज्यत। गौहाटी–विश्वविद्यालयस्य फणिधरदत्त–सभागारे समायोजिते संगोष्ठ्या उद्घाटनसमारोहे यादवपुरविश्वविद्यालयस्य संस्कृतविभागाध्याक्षा: मुख्यातिथिरूपेण तता पुरीस्थ–जगन्नाथ–संस्कृत–विश्वविद्यालयस्य मान्या: उपाचार्यमहाभागा: उद्घाटनभाषणं तता च विभागस्यैव प्राक्तना: विभागाध्यक्ष: राष्ट्रपतिपुरस्कारेण सम्मानिता आचार्या अशोक–कुमार–गोस्वामिमहाभागा: मुख्यभाषणं प्रस्तुतवन्त:। विभागीयछात्रै: छात्रीक्षिश्च उपस्थापितेन वैदिकमंगलाचरणेन समारोहस्य शुभारम्भ: अभवत्। विभागस्यैव प्राध्यापिकया श्रीमत्या ड॰ जगदीश शर्मणा समारोहस्य सञ्चालनं कृतं तथा च प्राध्यापिकया ड॰ सुजाता पुरकायस्थमहाभागया धन्यवादज्ञापनं कृतम्।

अस्यां सङ्गोष्ठ्यां विविधस्थानेभ्य: समागतै: विविधै: पण्डितै: गवेषकै: आचार्यैश्च शोधपत्राणि पठितानि। साकल्येन विंशति: शोधपत्राणि उपस्थापितानि अभवन्। संस्कृत–विभागाध्याक्षाणामेव सभापतित्वे मार्चमासस्य दशमे दिनाङ्के अपराह्ने द्विवादने समापनसमारोह: समनुष्ठित:। अस्मिन् समारोहे संस्कृतविभागस्य प्राक्तना: विभागाध्यक्षा: राष्ट्रपतिसम्मानेन सभाजिता: आचार्या: अपूर्वचन्द्र बरठाकुरिया महाभागा: मुख्यातिथिरूपेण तथा च कुमार–भास्करवर्म–संस्कृत–प्राचीनाध्ययन–विश्वविद्यालयस्य उपाचार्या: श्रीमन्त: ड॰ दीपक कुमार शर्ममहोदया: विशिष्टातिथिरूपेण समारोहमण्डपं मण्डितवन्त:। सभाया: सञ्चालनं अध्यापिकया श्रीमत्या ड॰ सुदेष्णा–भट्टाचार्यमहोदयया तथा च धन्यवादज्ञापनं प्राध्यपिकया श्रीमत्या ड॰ श्रुतिधराचक्रवर्तिमहाभागया कृतम्।

### छात्रावासे स्थानं प्राप्तुम् आवेदनपत्रम्

सम्मान्या: अधीक्षकमहोदया:,

..........................

गौहाटीविश्वविद्यालयस्य संस्कृतविभागे अद्यत: मासद्वयात् पूर्वं मम प्रवेश: संजात: आसीत्। इदानीं यावत् अहं गुवाहाटीयामेव एकस्य सम्बन्धिन: गृहे निवसामि। किन्तु विश्वविद्यालयात् मम एतत् निवासस्थानं बहुदूरे भवति। गमनागमने एव मम भूयान् काल: गच्छति। तत्र च सम्बन्धिन: परिवारास्य बाला: बालिकाश्च सर्वथा कोलाहलं कुर्वन्ति, इतस्तत: धावन्ति, कदाचित् उच्चै: क्रन्दन्ति, येन अध्ययने मम महती बाधा संजायते। अत: अहं विश्वविद्यालयस्य भवदीय–छात्रावासे स्थानं प्राप्तुमिच्छामि। विश्वसमीयसूत्रेण ज्ञातमस्ति यत् भवतां छात्रावासे एकं स्थानं रिक्तं वर्तते। तदर्थं चाहं अपेक्षितं छात्रावास–शुल्कमपि दत्तवान् अस्मि।

अत: भवस्तु सादरं मम अनुरोध: अस्ति यत् कृपया मह्यं छात्रावासे स्थानं प्रदाय माम् अनुगृह्णन्तु।

प्रार्थी

.................. ......................

..................

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

**Stop to consider ध्यातव्यम्**

- अभ्यासाय प्रदत्तेषु आवेदनपत्रेषु प्रार्थनापत्रेषु च आवेदनपत्रस्य प्रारूपानुसारं A- (सकाशात् द्वरा), B- (सविधे सेवायाम्), C- (विषय:), G- (हस्ताक्षरं पदं च), H- (स्थानं दिनांक:) चेति प्रविभागा: निर्दिष्टा: उल्लेखिता: वा न सन्ति। आवेदनपत्रस्य लेखनसमये पत्रप्रारूपानुसारं ते भागा: प्रसंगानुसारं स्वानकूल्येन भवद्भि: अवश्यं पूरणीया:। उल्लेखनीया:। अत्र उपन्यस्तानाम् आवेदनपत्राणां शीर्षकमेव पत्रस्य विषय:/विषयनाम भवितुमर्हति। पत्रस्य विषयानुसारं विषयस्य उल्लेखो विधेय:। अन्यभागानाम् उेल्लख: अपि पत्रस्य विषयं मनसि निधाय एव करणीय:।

## 1.4 अपठितांशावबोधनम् (Unseen Reading Comprehension)

Comprehension इत्युक्ते ''अवबोधनम्'' अथवा ''बोधशक्ति:''। इदम् अवबोधनं द्विविधं भवति (1) पठितम् अपि च (2) अपठितम्। पठितम् अपठितम् च एतत् अवबोधनं पुनरपि द्विप्रकारकं भवति (1) गद्यात्मकं (2) पद्यात्मकं चेति। किन्त्वत्र अपठितं गद्यात्मकं पद्यात्मकं चेति अवबोधनमेव अस्माकं पाठ्यत्वेन अस्माभि: स्वीकरणीयम्।

गद्यात्मके अवबोधने कश्चन अपठित: अनुच्छेद: प्रदीयते। पद्यात्मके पुन: अपठितं किमपि पद्यं प्रदत्तं भवति। तम् अनुच्छेदं तत् पद्यं वा आधारीकृत्य केचन प्रश्ना: दीयन्ते, येषां उत्तराणि लेखनीयानि भवन्ति।

लेखकस्य अनुच्छेदे कवे: पद्ये वा वर्णितस्य सन्निहितिस्य भावस्य विचारस्य च सम्यक् ज्ञानमेव अवबोधनं बोधो वा कथ्यते। अनेन अस्माकं बोधशक्ते: परीक्षणं तु भवत्येव, सहैव बोधशक्ते: विकासोऽपि संजायते। उदाहरणर्थं केचन अनुच्छेदा: कतिचित् पद्यानि च प्रश्नोत्तरै: सार्द्धं भवताम् अभ्यासाय अत्र प्रदीयन्ते–

### प्रथम अनुच्छेद:

''बसयानेषु आवागमनं दिनानुदिनं यातनाप्रदमेव परिकल्पते। अद्यत्वे बसयानेषु चालका: यात्रिभ्य: आरोहणं तु अतिथिवत् श्रद्धया कारयन्ति, यत्र तत्र बसयानम् अवरुध्य गन्तारमगन्तारं वा आरोहणायाह्वयन्ति, 'अतिथि–देवो भव' इति भारतीयपरम्पराञ्च सम्यक् परिपालयन्ति। यात्रिण: स्वकार्यस्थलं प्रति विलम्बिता: भवन्ति चेत् भवन्तु नाम, तेषां मनसि त्वेतदेव तिष्ठति यदधिकाधिकानि यात्रा–पत्राणि विक्रीतानि स्युरिति। लोकेषु एकवारं बसयाने प्रविष्टेषु सत्सु तेषामौदार्यं माधुर्यञ्च न जाने कुत्र याति। यात्रिणामवतरणसमये तु विशेषत एतावर्ती शीघ्रतां प्रदर्शयन्ति येन प्रायशो दुर्घटना अपि संघटिता जायन्ते। तस्मात् बसयानेषु यात्रा महत्या सावधानतयैव विधेया। स्मरणीयञ्चास्माभिरेतत् सदैव यत् सावधानता दुर्घटनात: श्रेयस्करी।''

**प्रश्ना :**

(1) यात्रिण: कं प्रति विलम्बिता: भवन्ति ?
(2) का कस्मात् श्रेयस्करी ?
(3) चालका: यात्रिभ्य: आरोहणं कथं कारयन्ति ?
(4) आरोहणाय कं कमाह्वयन्ति ?
(5) चालकानां मनसि किं तिष्ठति ?

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

(6) चालकाः किं सम्यक् परिपालयन्ति ?
(7) 'कष्टदायकम्' इति पदस्य समानार्थकं पदमत्र किमस्ति।
(8) 'विलम्बिताः भवन्ति' अत्र भवन्ति इति क्रियापदस्य कर्तृपदं किम् ?
(9) 'एतावतीं शीघ्रताम्' अत्र विशेषणपदं किम् ?
(10) 'आरोहणसमये' इति पदस्य विपरीतार्थकं पदमनुच्छेदात् चित्वा लिख्यताम्।

**उत्तराणि –**

(1) स्वकार्यस्थलम्।
(2) सावधानता दुर्घटनातः।
(3) अतिथिवत् श्रद्धया।
(4) गन्तारम् अगन्तारञ्च।
(5) चालकानां मनसि तिष्ठति यत् अधिकाधिकानि यात्रापत्राणि विक्रीतानि स्युः।
(6) चालकाः 'अतिथि-देवो भव' इति भारतीयपरम्परां सम्यक् परिपालयन्ति।
(7) यातनाप्रदम्।
(8) यात्रिणः।
(9) एतावतीम्।
(10) अवतरणसमये।

## द्वितीयः अनुच्छेदः

"एकदा एको वैदेशिकः प्रथमराष्ट्रपतेः श्रीराजेन्द्र-प्रसादस्य गृहं प्राप्तवान्। राष्ट्रपतेः परिचारकः तमतिथिगृहे प्रतीक्षितुमकथयत् तमसूचयच्च यद्राष्ट्रपतिमहोदयाः सम्प्रति पूजां कुर्वन्ति। सोऽतिथिः ज्ञातुमैच्छत् यद् राष्ट्रपतिः कथं करोति पूजाम् ? सङ्कोचं कुर्वाणोऽपि सोऽन्तः पूजागृहं प्रविष्टः। राष्ट्रपतेः समक्षं विद्यमानं मृत्पिण्डं सोऽवन्दत श्रद्धया च तत्रोपाविशत्। पूजां परिसमाप्य राष्ट्रपतिमहोदयः पूजागृहे तं दृष्ट्वा प्रसन्नोऽभवत् ससम्मानञ्च तमन्तोऽनयत्। आगन्तुकस्य ललाटे विद्यमानं भावं विज्ञाय श्रीराजेन्द्र प्रसाद महोदयः तस्य कौतूहलं वीक्ष्य तस्मै समबोधयत्-एतद् मृत्पिण्डं भारतस्य भूम्याः प्रतीकमस्ति। एतेन मृत्पिण्डेनैव भारतीयाः महतीमन्नात्मिकां सम्पदं प्राप्नुवन्ति। अत एव वयं मृत्तिकायाः कणेषु ईश्वरस्य दर्शनमपि कुर्मः। मानवेषु, पशुपक्षिषु, पाषाणेषु, वृक्षादिषु किं वा अचेतनेष्वपि ईश्वरस्य सत्ता अस्तीति अस्माकं विचारः"।

**प्रश्नाः**

(1) आगन्तुकस्य कौतूहलं किमासीत् ?
(2) ईश्वरस्य विषये भारतीयानां कः विचारः अस्ति ?
(3) राष्ट्रपतिः आगन्तुकाय किं समबोधयत् ?
(4) किं कुर्वन् आगन्तुकः पूजागृहं प्रविष्टः ?
(5) भारतीयाः कुत्र ईश्वरस्य दर्शनं कुर्वन्ति ?
(6) 'चिह्नम्'- इति पदस्य कः पर्यायः अत्र प्रयुक्तः ?
(7) 'भावम्' इति विशेष्यपदस्य विशेषणं किम् ?
(8) 'प्राप्नुवन्ति'- अस्याः क्रियायाः कर्तृपदं किम् ?
(9) 'सोऽवन्दत'-अत्र 'सः' इति सर्वनामपदं कस्मै प्रयुक्तम् ?
(10) भारतभूम्याः प्रतीकं किमस्ति ?

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

**उत्तराणि–**

(1) पूजागृहे राष्ट्रपतेः समक्षं विद्यमानस्य मृत्पिण्डस्य विषये ज्ञानाय आगन्तुकस्य कौतूहलमासीत्।

(2) मानवेषु, पशुपक्षिषु, पाषाणेषु, वृक्षादिषु किं वा अचेतनेष्वपि ईश्वरस्य सत्ता अस्तीति भारतीयानां विचारः।

(3) राष्ट्रपति आगन्तुकाय समबोधयत् यत् एतद् मृत्पिण्डं भारतभूम्याःऋ प्रतीकमस्ति। एतेन मृत्पिण्डनैव भारतीयाः महतीमन्नात्मिकां सम्पदं प्राप्नुवन्ति।

(4) आगन्तुकः सङ्कोचं कुर्वन् पूजागृहं प्रविष्टः।

(5) भारतीयाः मृत्तिकायाः कणेषु ईश्वरस्य दर्शनं कुर्वन्ति।

(6) 'प्रतीकम्'–इति पर्यायः।

(7) 'विद्यामानम्'–इति विशेषणपदम्।

(8) 'भारतीयाः'–इति कर्तृपदम्।

(9) 'सः' इति सर्वनामपदं वैदेशिकाय आगन्तुकाय प्रयुक्तम्।

(10) 'मृत्पिण्डम्'–भारतभूम्याः प्रतीकमस्ति।

**Stop to consider ध्यातव्यम्**

- प्रश्नोत्तरदानात् प्राक् प्रदत्तः अनुच्छेदः पुनः पुनः (वारद्वयं, वारत्रयं, वारचतुष्टयम्) पठ्यताम्।
- अनुच्छेदे वर्णितः विषयः, लेखकस्य विचारः, भावश्च सम्यक् अवगम्यताम्।
- अनुच्छेदे प्रयुक्तानां कर्तृ–कर्म–क्रियापदानां ज्ञानमावश्यकम्।
- कर्तृ–कर्म–क्रियापदातिरिक्ततया विशेष्य–विशेषणपदानि अपि परिशीलनीयानि।
- यथानिर्देशं प्रश्नोत्तराणि प्रदेयानि।
- प्रश्नोत्तरे सरलायाः परिमार्जितायाः शुद्धभाषायाश्च प्रयोगो विधेयः।

**अधुना अधस्तनं पद्यात्मकमनुच्छेदं परिशीलयन्तु–**

**प्रथमं पद्यम्**

**रथः शरीरं पुरुषस्य राजन्**
**आत्मा नियन्तेन्द्रियाण्यस्य चाश्वाः।**
**तैरप्रमत्तः कुशली सदश्वैः**
**दान्तैः सुखं याति रथीव धीरः॥**

**पदच्छेद :** रथः शरीरम् पुरुषस्य राजन्
आत्मा नियन्ता–इन्द्रियाणि अस्य च अश्वाः।
तैः अ–प्रमत्तः कुशली सदश्वैः
दान्तैः सुखम् याति रथी इव धीरः।

**अन्वय :** राजन्! पुरुषस्य शरीरं रथः। आत्मा सारथिः। इन्द्रियाणि अश्वाः भवन्ति। तैः इन्द्रियरूपैः सुनियन्त्रितैः अश्वैः अविचलितः कुशली धीरः रथी इव चतुरः जनः सुखेन यात्रां कर्तुं शक्नोति।

**प्रश्नाः**

(1) शरीरथस्य नियन्ता कः ?

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

(2) कानि शरीरथस्य अश्वाः भवन्ति ?
(3) रथः कस्य शरीरम् ?
(4) कीदृशः रथी सदश्वैः सुखं याति ?
(5) 'सुनियन्त्रितैः'–इति पदस्य पर्यायः कः ?
(6) 'याति'–इति क्रियापदस्य कर्तृपदं किम् ?
(7) 'तैः' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?
(8) 'अस्य'–इति सर्वनामपदं कस्य विशेषणम् ?
(9) 'अप्रमत्तः'–इति पदस्य विलोमपदं किम् ?
(10) 'कुशली रथीव धीरः'–अत्र विशेष्यपदं किम् ?
(11) अस्य पद्यस्य सारांशः कः ?

**उत्तराणि–**

(1) शरीरथस्य नियन्ता आत्मा।
(2) इन्द्रियाणि शरीररथस्य अश्वाः भवन्ति।
(3) रथः पुरुषस्य शरीरम्।
(4) अप्रमत्तः, कुशली, धीरश्च रथी सदश्वैः सुखं याति।
(5) 'दान्तैः' इति।
(6) पुरुषः।
(7) इन्द्रियरूपेभ्यः अश्वेभ्यः।
(8) पुरुषशरीरस्य/शरीरथस्य।
(9) अविचलितः।
(10) रथी।
(11) इन्द्रियाणां नियन्त्रेण जीवनं सुखमयं भवतीति अस्य पद्यस्य सारांशः।

**द्वितीयं पद्यम्**

**यस्तान न क्रुध्यति सर्वकालं**
**भृत्यस्य भक्तस्य हिते रतस्य।**
**तस्मिन भृत्वा भर्तरि विश्वसन्ति**
**न चैनमापत्सु परित्यजन्ति॥**

**पदच्छेद :** यस्तात न क्रुध्यति सर्वकालम्
भृत्यस्य भक्तस्य हिते रतस्य।
तस्मिन् भृत्या भर्तरि विश्वसन्ति
न च एनम् आपत्सु परित्यजन्ति॥

**अन्वय :** तात! यः बिते रतस्य भक्तश्य भत्यस्य सर्वकालं न क्रुध्यति, तस्मिन् भर्तरि भृत्याः विश्वसन्ति, एनं च आपत्सु न परित्यजन्ति।

**भावार्थ :** यः स्वामी (राजा) हितकारिभ्यः भक्तसेवकेभ्यः कदापि न क्रुध्यति, तादृशे स्वामिनि सेवकाः सदा विश्वसन्ति, विपत्काले अपि तं स्वामिनं नैव त्यजन्ति।

**प्रश्नाः**

(1) भृत्याः कस्मिन् विश्वसन्ति ?

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com   For evaluation only.

(2) कीदृशाय भृत्याय क्रोधः न उचितः ?
(3) भृत्याः अक्रुध्यन्तं भर्तारं कासु न परित्यजन्ति ?
(4) 'लीनस्य'-इत्यर्थे अत्र किं पदं प्रयुक्तम् ?
(5) 'तस्मिन्'-इति सर्वनामपदं कस्मै प्रयुक्तम् ?
(6) 'भृतस्य भक्तस्य'-अत्र विशेष्यपदं किमस्ति ?
(7) 'यः'-इति सर्वनामपदं कस्मै प्रयुक्तम् ?
(8) भृत्या आपत्सु कं न परित्यजन्ति ?

**उत्तराणि -**

(1) भृत्याः भर्तरि विश्वसन्ति।
(2) सर्वथा स्वामिनः हिते रताय भक्तभृत्याय क्रोधः न उचितः।
(3) भृत्याः अक्रुध्यन्तं भर्तारम् आपत्सु न परित्यजन्ति।
(4) रतस्य।
(5) स्वामिने/भर्त्रे।
(6) भृत्यस्य।
(7) स्वामिने।
(8) स्वामिनं/भर्तारम्।

**Stop to consider ध्यातव्यम्**

- पद्याधारितप्रश्नानाम् उत्तरदाने विशेषसावधानता अवलम्बनीया।
- प्रथमतया पद्यस्य पदच्छेदः तदनु तस्य अन्वयः कर्तव्यः। तत्पश्चात् तस्यार्थं भावार्थं वा सम्यक् विज्ञाय प्रश्नोत्तरं कार्यम्।
- पदच्छेदेन पदानाम् अपि च अन्वयेन कर्तृ-कर्म-क्रिया-विशेष्य-विशेषणपदानां ज्ञानं भविष्यति, तेन च उत्तरदानं सुकरं भविष्यति।

**अधुना अधस्तात् केचन गद्यात्मकाः अनुच्छेदाः भवताम् अभ्यासाय प्रदीयन्ते। तान् सम्पठ्य प्रदत्तान् प्रश्नान् समुत्तरन्तु-**

**प्रथमः अनुच्छेदः**

"अस्ति कस्मिंश्चिद्वनोद्देशे वज्रदंष्ट्रो नाम सिंहः। तस्य चतुरक-क्रव्यमुखनामानौ शृगालवृकौ भृत्यभूतौ सदैवानुगतौ तत्रैव वने प्रतिवसतः। अथाऽन्यदिने सिंहेन कदाचिदासन्न-प्रसवा प्रसववेदनया स्वयूथाद् भ्रष्टा उष्ट्रयुपविष्टा कस्मिंश्चिद्वनगहने समासादिता। अथ तां व्यापाद्य यावदुदरं स्फोटयति, तावज्जीवँल्लघु दासेरकशिशुर्निष्क्रान्तः। सिंहोऽपि दासेरकः पिशितेन सपरिवारः परां तृप्तिमुपागतः। परं स्नेहाद् बालदासेरकं त्यक्तुं गृहमानीयेदमुवाच-'भद्र'! न तेऽस्ति मृत्योर्भयं मत्तो, नान्यस्मादपि। ततः स्वेच्छायाऽत्र वने भ्राम्यताम्। यतस्ते शङ्कुसदृशौ कर्णौ, ततः शङ्कुकर्णो नाम भविष्यति " इति।

**प्रश्नाः**

(1) कौ कस्य भृत्यभूतौ वने प्रतिवसतः ?
(2) सिंहेन कीदृशी उष्ट्री हता ?

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

(3) दासेरकशिशुः कुतः निष्कान्तः ?
(4) उष्ट्री कुत्र उपविष्टा आसीत् ?
(5) सिंहः कं गृहम् आनीतवान् ?
(6) "भद्र ! न तेऽस्ति मृत्योर्भयं मत्तो" इति पदं कस्मै प्रयुक्तम् ?
(7) उष्ट्रयाः पुत्रस्य नाम किमासीत् ?
(8) 'समासादिता'-इति क्रियापदस्य कर्तृपदं किम् ?
(9) 'ताम्'-इति सर्वनामपदं कस्मै प्रयुक्तम् ?
(10) शृगालवृकौ कस्य अनुगतौ आस्ताम् ?

## द्वितीयः अनुच्छेदः

वैज्ञानिकाः सञ्चारसाधनेषु प्रतिदिनं नवीनतमान् आविष्कारन् कुर्वन्ति येन सन्देशप्रेषणेऽधिकतमं सौविध्यं स्यात्। चलभाषितयन्त्रम् (Mobile cellphone) तादृशमेवैकं लोकप्रिययन्त्रम्। बालवृद्धयुवकानां महिलापुरुषाणां नागरिक-ग्रामीण-कर्मकराणाञ्च सर्वेषामेवैतत् कर्णभूषणं सञ्जायते। यानानि आरूढ़ाः, कार्यालयेषु कार्य कुर्वन्तः, मार्गेषु गच्छन्त आगच्छन्तः, सभागारेषु प्रवचनं कुर्वन्तः शृण्वन्तश्च जनाः अस्य ध्वनिमाकर्ण्य वार्तामग्नाः भवन्ति। अविवेकपूर्णः प्रयोगोऽस्य कार्येषु व्यवधानं विदधाति। मार्गेषु दुर्घटनाः भवन्ति। अव्यवस्था संपद्यते सभागारेषु, कक्षासु, अन्यस्थानेषु च। आविष्कारः कदापि हानिकरो न भवतीति सत्यम् परन्तु तस्य दुष्प्रयोगेण जीवनस्य शान्तिर्नश्यति। वस्तुतस्तु यन्त्रमस्माकमधीनं स्यात्, न वयं यन्त्राधीनाः भवेमेति तदर्थं सर्वथा प्रयतनीयम्।

**प्रश्नाः**

(1) विज्ञानस्योपयोगं के के कुर्वन्ति ?
(2) अस्य यन्त्रस्य अविवेकपूर्णेन प्रयोगेण किं भवति ?
(3) 'लाभकरः'-इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखताम् ?
(4) केषामधीने के न भवेयुः ?
(5) 'अस्य अविवेकपूर्णः प्रयोगः'-इत्यत्र 'अस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?
(6) अद्यत्वे सर्वेषां कर्णभूषणं किम् ?
(7) जीवनस्य शान्तिः कथं नश्यति ?
(8) जनाः किं किं कुर्वन्तः वार्तामग्नाः भवन्ति।
(9) 'नवीनतमान् अविष्कारान्'-अनयोः विशेषणपदं किमस्ति ?
(10) अस्य अनुच्छेदस्य शीर्षकं लेखनीयम्।

## तृतीयः अनुच्छेदः

"एकदा शीतस्य भीषणः प्रकोपोऽभवत्। सम्राट् चन्द्रगुप्तश्चिश्चितवान् यन्निर्धनेभ्यः कम्बलानां वितरणं विधेयम्। प्रधानमंत्री तत्कार्यं स्वीचकार। भृत्याः सर्वान् कम्बलान् तत्कुटीरे स्थापयामासुः। चौराश्च केचन रात्रौ तत्कम्बलान् चोरयितुं तस्य कुटीरं प्राविशन्। तेऽपश्यन् च प्रविश्य यच्चाणक्य एकस्मिन् कटे कम्बलं विनैव सुप्तः। तस्मिन्नेव क्षणे पदध्वनिमाकर्ण्य प्रबुद्धश्चाणक्यः। चौरास्तमपृच्छन्-"भवतां सविधे कम्बलानां राशिरस्ति तथापि कम्बलं विनैव स्वपिति भवान्"। चाणक्योऽवदत्-'शृणुत ! एते प्रावारकाः केवलं निर्धनेभ्यो वितरणार्थमेव वर्तन्ते। यद्यहमेतेष्वेकं स्वीकरोमि तर्हि मयाऽपि चौरेणैव भवितव्यम्।"नतमस्तकाः चौराः" तत्पादयोः पतित्वा क्षमायाचनाञ्चक्रुः"।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

**प्रश्नाः**

(1) विना कम्बलं कः कुत्र शेते स्म ?
(2) किम् अन्यत् कम्बलस्य पर्यायपदमत्र प्रयुक्तम् ?
(3) भृत्याः कम्बलान् कुत्र स्थापितवन्तः ?
(4) शीतस्य प्रकोपं वीक्ष्य चन्द्रगुप्तः किम् ऐच्छत्।
(5) चौराः चाणक्यं किम् अपृच्छन् ?
(6) 'तेऽपश्यन्'– इत्यत्र 'ते' इति सर्वनामपदं केभ्यः प्रयुक्तम्।
(7) चन्द्रगुप्तस्य प्रधानमंत्री कः आसीत् ?
(8) 'श्रृणुत'– इति क्रियापदस्य कर्तृपदं किम् ?
(9) चाणक्यश्चौरान् सम्बोध्य किम् अकथयत् ?
(10) अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं लिखताम्।

**चतुर्थः अनुच्छेदः**

''तस्य वचनमश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन् – 'भो ! किमिदमुच्यते ? न वयं स्वर्गसमानोपभोगान् विहायाटव्यां क्षार–तिक्त–कषाय–कटु–रुक्षफलानि भक्षयिष्यामः। एतच्छुत्वा साश्रुनयनो यूथपतिः सगद्गदमुक्तवान्' –रसनास्वादलुब्धाः यूयमस्य कुपरिणामं न जानीथ। अहं वनं गच्छामि।''

अथान्यस्मिनहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेणार्थज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थामश्वाशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः।

**प्रश्नाः**

(1) कपयः कीदृशाः आसन् ?
(2) वह्निज्वालाः कुत्र समुत्थिताः ?
(3) यूथपतिः किमकथयत् ?
(4) मेषः कुत्र प्रविशति ? कस्माद्धेतोश्य भूमौ लुठति ?
(5) अटव्यां कीदृशानि फलानि प्राप्यन्ते ?
(6) बह्निज्वालाः कथं समुत्थिताः ?
(7) वानराः किं परित्यज्य वनं गन्तुं नेच्छन्ति ?
(8) 'रुदनं कृत्वा' इत्यस्य पस्यस्य विपरीतार्थकमनुच्छेदात् चित्वा लिख्यताम्।
(9) 'तस्य वचनमश्रद्धेयम्'–इत्यत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?
(10) 'ताडितः' –इति क्रियापदस्य कर्मपदं किम् ?

**अधुना अधोलिखितान् पद्यात्मकान् अनुच्छेदान् पठन्तु। पद्यस्य पदच्छेदं कुर्वन्त। तस्य अन्वयं विधाय भावार्थं च विज्ञाय तदाधारितान् प्रदत्तप्रश्नान् उत्तरन्तु–**

**प्रथमं पद्यम्**

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात्।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

दिनस्य पूर्वार्द्ध–परार्द्धभिन्ना
छायेव मैत्री खल–सज्जनानाम्॥

**प्रश्नाः**

(1) छाया दिनस्य पूर्वार्द्धे कीदृशी भवति?
(2) दुर्जनानां मित्रता दिवसस्य प्रथमार्धे कीदृशी भवति?
(3) सज्जानानां मित्रता कीदृशी भवति?
(4) दिनस्य उत्तरार्द्धस्य छाया इव केषां मित्रता भवति?
(5) 'छाया'–इति पदस्य विशेषपदानि पद्यात् चित्वा लिखन्तु।
(6) पद्ये दुर्जन–सज्जनानां मित्रता केन उपमिता अस्ति?
(7) अस्य पद्यस्य एकमुपयुक्तं शीर्षकं लिख्यताम्।
(8) कविः दिनस्य पूर्वार्द्धेन खलानां मित्रतां कथम् उपमाति?
(9) 'दीर्घा'–इति पदस्यार्थे पद्ये किं पदं प्रयुक्तमस्ति?

**द्वितीयं पद्यम्**

पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकासयति कैरवचक्रवालम्।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः॥

**प्रश्नाः**

(1) सूर्यः कं विकासयति?
(2) सज्जनाः कीदृशाः भवन्ति?
(3) अप्रार्थितोऽपि चन्द्रः किं करोति?
(4) कीदृशः वारिदः जलं ददाति?
(5) आप्रार्थितः सन्नपि कः कः किं किं करोति?
(6) अस्मिन् पद्ये केषां प्रशंसा कृता वर्तते?
(7) कीदृशाः जनाः परोपकारेषु स्वयमेव संलग्नास्तिष्ठन्ति?
(8) 'कुमुद'–इति पदस्यार्थे अत्र किं पदं प्रयुक्तम्?

**तृतीयं पद्यम्**

जाड्यं हरति, सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति, पापमपाकरोति।
चेतः प्रसादयति, दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्॥

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

**प्रश्नाः**

(1) 'वचने'-इत्यर्थे पद्ये किं पदं व्यवहतमस्ति ?
(2) सत्सङ्गतिः केषां कर्म दूरीकरोति ?
(3) सत्सङ्गतिः किं नाशयति ?
(4) सत्सङ्गते के के लाभाः जायन्ते ?
(5) 'किं न करोति'- इतिवाक्यांशेन कवेः कोऽभिप्रायोऽस्ति ?
(6) अस्मिन् पद्ये कस्याः महिमा वर्णितोऽस्ति ?
(7) 'तनोति'-इति क्रियापदस्य कर्तृपदं किमस्ति ?
(8) कया मनसः (हृदयस्य) प्रसादनं भवति ?
(9) 'मन्दताम्', 'अज्ञानतां' वा कस्य पदस्यार्थः भवितुमर्हति ?
(10) सत्सङ्गतिः अस्माकं कुत्र किं विस्तारयति ?

**चतुर्थं पद्यम्**

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते॥

**प्रश्नाः**

(1) 'महाबाहो'-इत्यनेन कः सम्बोध्यते ?
(2) मनः कथं वशीकर्तुं शक्यते ?
(3) मनः कीदृशं भवति ?
(4) 'गृह्यते'-इति क्रियापदस्य कर्तृपदं किमस्ति ?
(5) मनः काभ्यां गृह्यते ?
(6) 'मनः'-इति पदाय प्रयुक्तं किमपि विशेषणपदं पद्यात् चित्वा लिख्यताम्।
(7) 'अनुरागेण'-इत्यस्य विपरीतार्थकं पदं पद्यात् चित्वा लिख्यताम्।
(8) कस्य वशीकरणं कठिनं भवति ?
(9) 'यस्य वशीकरणं कठिनम्'-इत्यस्य अर्थस्य समानार्थकं किं पदमत्र प्रयुक्तमस्ति ?
(10) अस्य पद्यस्य उपयुक्तं शीर्षकं लिख्यताम्।

### 1.5 अशुद्धिसंशोधनम्

शुद्धा परिमार्जिता परिनिष्ठिता च भाषा सदैव प्रभावोत्पादिका भवति। शुद्धभाषां सर्वे प्रशंसन्ति। प्रयोग- कर्तुरपि समुत्साहः आत्मविश्वासश्च संवर्द्धते। अतः भाषायाः शुद्धतया प्रयोगे विशेषावधानमावश्यकम्। संस्कृतभाषायाः प्रयोगक्षेत्रेऽपि एतत्समानरूपेणैव प्रयुज्यम् अवधेयं चास्ति।

अशुद्धयो नैकविधाः। संस्कृतभाषाप्रयोगे प्रायशः संज्ञा-सर्वनाम-सम्बन्धिन्यः, विशेष्य-विशेषणविषयकाः, लिङ्गसन्धिन्यः समास-प्रत्यय-विभक्तिसम्बन्धिन्यः अशुद्धयः जायन्ते। अतः अस्मिन् विषये सावधानतया पुनः पुनः अभ्यासः करणीयः भवति। अभ्यासाय च तया भाषया बाग्व्यवहारः, वार्तालापः पत्र-निबन्धादीनां च लेखनं सहायकं भवति। पठित-विषयाणां व्यावहारिक-जीवने प्रयोगेण महान् लाभः भवति। उदाहरणार्थमधो लिखितानि वाक्यानि पश्यन्तु-

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

| अशुद्ध-वाक्यम् | शुद्ध-वाक्यम् |
|---|---|
| (1) अहो विधिर्वलवती | (1) अहो विधिर्बलवान्। |
| (2) यया कार्याणी सिध्यन्ति स लक्ष्मीत्यभिधीयते। | (2) यया कार्याणि सिध्यन्ति सा लक्ष्मीरित्यभिधीयते। |
| (3) देशे किम्वदन्ती यत् सुभाषवसु-रद्यापि जीवितोऽस्ति। | (3) देशो किंवदन्ती यत्सुभाषवसुर-द्यापि जीवितोऽस्ति। |
| (4) सभा भवितव्या। | (4) सभया भवितव्यम्। |
| (5) वर्धनं वाऽथा सम्मानं खलानां प्रीतये कुत:। | (5) वर्धनं वाऽथ सम्मान: खलानां प्रीतये कुत:। |
| (6) पिता रत्नाकरो यस्य लक्ष्मीर्यस्य सदोदरी। | (6) पिता रत्नाकरो यस्य लक्ष्मीर्यस्य सहोदरा। |
| (7) कथं वृथा प्रकुप्यसि गुरौ। | (7) कथं वृथा प्रकुप्यसि गुरवे। |
| (8) योऽद्य विहरति स: तदापि अविहरत्। | (8) योऽद्य विहरति स: तदापि व्यहरत्। |
| (9) विडालोऽयं नित्यं भोजनसमये उपतिष्ठति। | (9) विडालोऽयं नित्यं भोजनसमये उपतिष्ठते। |
| (10) न जातु दुष्ट: कदापि स्वभावं त्यजति। | (10) न जातु दुष्ट: स्वभावं त्यजति। |

**Stop to consider ( ध्यातव्यम् )**

(1) उपर्युक्त प्रथमे वाक्ये 'विधि:', इति शब्द: पुंलिङ्गे अस्ति। अत: तद्विशेषणत्वेन 'बलवान्' इति शुद्धप्रयोगो भविष्यति।

(2) 'लक्ष्मी' शब्द: दीर्घेकारान्त: औणादिक:। अत्र 'सु' इत्यस्य लोपो न भवति। प्रथमैकवचने 'लक्ष्मी:' इति रूपं जायते।

(3) तृतीये वाक्ये 'मोऽनुस्वार:' इति पाणिनिसूत्रेण अनुस्वार: भवति। अत 'किंवदन्ती' इति शुद्धं रूपम्।

(4) 'भू' धातु: अकर्मक:।'तव्यत्' प्रत्ययस्य च प्रयोग: कर्मवाच्ये भाववाच्ये वा भवति। 'भू' धातो: अकर्मकत्वात् भावे प्रयोग:।

(5) पञ्चमे वाक्ये प्रयुक्त: 'सम्मान'-इति पदं घञ्प्रत्यय-संयोगेन निष्पद्यते। घञ्परत्ययान्तशब्दा: पुल्लिङ्गे भवन्ति।

(6) 'सहोदर' शब्दात् स्त्रीलिङ्गे 'टाप्' इति प्रत्ययसंयोगेन 'सहोदरा' इति शुद्धरूपं भवति।

(7) सप्तमे वाक्ये ''क्रुधद्रुहेर्ष्यासूयार्थनां यं प्रतिकोप:'' इति सूत्रेण 'प्रकुप्यसि' इत्यनेन सह चतुर्थी विभक्तिर्भवति 'गुरवे' इति।

(8) 'अविहरत्' इत्यत्र अट्-उपसर्ग: धातो: पूर्वं 'वि' इत्यस्य च परं प्रयुज्यते। अत: 'व्यहरत्' इति शुद्धं रूपं लङ्लकारे।

(9) ''उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वक्तव्यम्'' इति वार्तिकेन उप-पूर्वक-स्था-धातु आत्मनेपदी जायतेष

(10) 'जातु' तथा च 'कदापि' इत्यनयो: शब्दयो: अर्थ: एक (समान:) एव भवति। अत: उभयोरेकस्यैव प्रयोगो विधेय:।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

**अधुना भवताम् अभ्यासाय कानिचित् वाक्यानि अधः उपस्थाप्यन्ते। तेषाम् अभ्यासः करणीयः, दैनन्दिनजीवने च तत्प्रयोगाय यतनीयम्-**

| | अशुद्ध-वाक्यम् | | शुद्ध-वाक्यम् |
|---|---|---|---|
| 1. | दशरथस्य कोसल्याया रामो नाम पुत्ररत्नमजनि। | 1. | दशरथस्य कोसल्यायां रामो नाम पुत्ररत्नमजनि। |
| 2. | देवी खड्गेन शुम्भस्य शिरोऽप्रहरत्। | 2. | देवी खड्गेन शुम्भस्य शिरः प्राहरत्। |
| 3. | मम मित्रः मूर्खः अस्ति। | 3. | मम मित्रं मूर्खः अस्ति। |
| 4. | अग्निः शीतला अस्ति। | 4. | अग्निः शीतलः अस्ति। |
| 5. | अस्याः वार्तायाः मिथ्याभवने न कोऽपि सन्देहः। | 5. | अस्याः वार्तायाः मिथ्यात्वे न कोऽपि सन्देहः। |
| 6. | वृक्षैः उद्यानः शोभते। | 6. | वृक्षैः उद्यानं शोभते। |
| 7. | अध्यक्षः त्रिंशद्भिः छात्रैः (छात्राभिः) सह आगतः। | 7. | अध्यक्षः त्रिंशता छात्रैः (छात्राभिः) सह आगतः। |
| 8. | सहस्राः जनाः धावन्ति। | 8. | सहस्रं जनाः धावन्ति। |
| 9. | पयः मधुरः भवति। | 9. | पयः मधुरं भवति। |
| 10. | बिहू असमप्रान्तस्य प्रसिद्धः पर्वः अस्ति। | 10. | बिहू असमप्रान्तस्य प्रसिद्धं पर्व अस्ति। |
| 11. | गोपालः मम स्नेहपात्रः। | 11. | गोपालः मम स्नेहपात्रम्। |
| 12. | तरन्ति सन्तो जगतो महान्तः। | 12. | तरन्ति सन्तो जगत् महान्तः। |
| 13. | अयं जगत् चराचरात्मकम्। | 13. | इदं जगत् चराचरात्मकम्। |
| 14. | उपनिषत्सु इदम् एकं प्रसिद्धम् उपनिषत्। | 14. | उपनिषत्सु इदम् एका प्रसिद्धा उपनिषत्। |
| 15. | इयमार्षा भणितिः कस्य चेतो लावर्जयति। | 15. | इयमार्षी भणितिः कस्य चेतो नावर्जयति। |
| 16. | सुन्दरया अनया बालया को न युवको विस्मापितः। | 16. | सुन्दर्या अनया बालया को न युवको विस्मापितः। |
| 17. | दुर्जनाः परकार्येषु बहूनि विघ्नानि कुर्वन्ति। | 17. | दुर्जनाः परकार्येषु बहून् विघ्नान् कुर्वन्ति। |
| 18. | सीता रामस्य प्रियमासीत्। | 18. | सीता रामस्य प्रिया आसीत्। |
| 19. | गुणवान् जनः प्रीतिपात्रः भवति। | 19. | गुणवान् जनः प्रीतिपात्रं भवति। |
| 20. | व्याधिः भयंकरा अस्ति। | 20. | व्याधिः भयंकरी अस्ति। |
| 21. | धर्मः आचरणीयम्। | 21. | धर्मः आचरणीयः। |
| 22. | कार्यक्रमः भवितव्यः। | 22. | कार्यक्रमेण भवितव्यम्। |
| 23. | पिता पुत्रं क्रुध्यति। | 23. | पिता पुत्राय क्रुध्यति। |
| 24. | कोकिलायाः कण्ठस्वरमति-मधुरमस्ति। | 24. | कोकिलायाः कण्ठस्वरः अति मधुरः अस्ति। |
| 25. | श्वः प्रात एवागच्छ। | 25. | श्वः प्रातरेवागच्छ। |

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

| | |
|---|---|
| 26. द्वौ द्वौ चत्वारो भवन्ति। | 26. द्वे द्वे चत्वारि भवन्ति। |
| 27. विश्वेऽस्मिन् अनृतात् परतरं पातकं नास्ति। | 27. विश्वस्मिन् अस्मिन् अनृतात् परतरं पातकं नास्ति। |
| 28. उर्वशी नामाप्सरा स्वर्गस्यालङ्कार:। | 28. उर्वशी नामाप्सरा: स्वर्गस्यालङ्कार:। |
| 29. वीणाया: तन्त्री विच्छिन्ना। | 29. वीणाया: तन्त्री विच्छिन्ना। |
| 30. इतरं नास्ति कारणमस्य। | 30. इतरत् नास्ति कारणमस्य। |
| 31. नास्ति मे मरणस्य भयम्। | 31. नास्ति मे मरणात् भयम्। |
| 32. बहुपन्था अयं ग्राम:। | 32. बहुपथोऽयं ग्राम:। |
| 33. नदीभ्यो गङ्गा श्रेष्ठा। | 33. नदीषु गङ्गा श्रेष्ठा। |
| 34. सूर्यस्य तेजेन भूमण्डलं तप्तम्। | 34. सूर्यस्य तेजसा भूमण्डलं तप्तम्। |
| 35. त्रिषु छात्रासु रमा योग्या। | 35. तिसृषु छात्रासु रमा योग्या। |
| 36. भगवान् एव मम शरण:। | 36. भगवान् एव मम शरणम्। |
| 37. सेवक: स्वामिनं सेवति। | 37. सेवक: स्वामिनं सेवत। |
| 38. माता भोजनं पचिष्यन्ति। | 38. माता भोजनं पक्ष्यति। |
| 39. मुनय: आश्रमे यजिष्यन्ति। | 39. मुनय: आश्रमे यक्ष्यन्ति। |
| 40. मृतभर्ता इयं नारी। | 40. मृतभर्तृका इयं नारी। |
| 41. पर्वते अविस्थत्वा रात्रिं यापय। | 41. पर्वते अवस्थाय रात्रिं यापय। |
| 42. कृष्ण: कंसमहनत्। | 42. कृष्ण: कंसमहन्। |
| 43. नाहं लवणप्रिय:। नास्ति मे लवणस्य प्रयोजनम्। | 43. नाहं लवणप्रिय:। नास्ति मे लवणेन प्रयोजनम्। |
| 44. वल्गां संनियम्य मन्दीकुरु रथवेगम्। | 44. वल्गा: संनियम्य मन्दीकुरु रथवेगम्। |
| 45. भगवत: शपथेन कथयामि, नैतन्मया कदापि कृतम्। | 45. भगवत शपे। नैतन्मया कदापि कृतम्। |
| 46. स्वामिनं प्रार्थयित्वा गृहं गच्छ। | 46. स्वामिनं प्रार्थ्य गृहं गच्छ। |
| 47. कवि: द्वौ श्लोकौ विरच्य प्रेषितवान्। | 47. कवि: द्वौ श्लोकौ विरचय्य प्रेषितवान्। |
| 48. वाङ्मनोतीताय ब्रह्मणे नम:। | 48. वाङ्मनसातीताय ब्रह्मणे नम:। |
| 49. पुराणीयं कलिर्नैषा शक्या शमयितुम्। | 49. पुराणोऽयं कलिर्नैषा शक्य: शमयितुम्। |
| 50. रमा नगरे एव वसिष्यति। | 50. रमा नगरे एव वत्स्यति। |
| 51. माला कमलानि लभिष्यति। | 51. माला कमलानि लप्स्यते। |
| 52. अहं तुभ्यं वस्त्रं न यच्छिष्यामि। | 52. अहं तुभ्यं वस्त्रं न दास्यामि। |
| 53. बालका: चलचित्रं दर्शिष्यन्ति। | 53. बालका: चलचित्रं द्रक्ष्यन्ति। |
| 54. अहं स्वकर्मं सदा निष्ठया करोमि। | 54. अहं स्वकर्म सदा निष्ठया करोमि। |
| 55. अहोऽस्मि परमप्रीतो यस्य मे त्वादृश: सखा। | 55. अहो अस्मि परमप्रीतो यस्य मे त्वादृश: सखा। |
| 56. पूर्वस्यां दिशि सूर्य: उदेति पश्चिमस्यां चास्तमेति। | 56. पूर्वस्यां दिशि सूर्य: उदेति पश्चिमायां चास्तमेति। |

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

| | |
|---|---|
| 57. तव जीवनाय धिक्। | 57. तव जीवनं धिक्। |
| 58. कदापि मृषां मा वदेत्। | 58. कदापि मृषा मा वदेत्। |
| 59. मातृपितृहीनः बालोऽयम्। | 59. मातृपितृहीनः बालोऽयम्। |
| 60. ते वाक्यं मम न रोचते। | 60. ते वाक्यं मह्यं न रोचते। |

**Check Your Progress ( आत्मनिरीक्षणं क्रियताम् )**

- अधोलिखितानि अशुद्धवाक्यानि संशोध्य रिक्तस्थाने पुनः लिख्यन्ताम्–

| अशुद्ध-वाक्यम् | शुद्ध-वाक्यम् |
|---|---|
| 1. भवतः किमर्थं मिष्ठान्नं न रोचते। | 1. ........................ |
| 2. धिक् तेभ्यः कर्तव्यविमुखेभ्यः। | 2. ........................ |
| 3. कक्षायाम् एकविंशतयः छात्राः सन्ति। | 3. ........................ |
| 4. पुत्राः मातरं सेविष्यन्ति। | 4. ........................ |
| 5. रामः दशरथस्य प्रियमासीत्। | 5. ........................ |
| 6. त्रिंशद्भिरपि वर्षैर्नेदं शक्यं साधयितुम्। | 6. ........................ |
| 7. अतीते महायुधि लक्षशो योधाः मृताः। | 7. ........................ |
| 8. यादृशी शीतला देवी तादृशो वाहनः खरः। | 8. ........................ |
| 9. गम्भीरमिदं जलाशयं नात्र स्नातव्यम्। | 9. ........................ |
| 10. शास्त्रपारङ्गतः स आचार्यचरणात् विद्यावाचस्पतिपदं लेभे। | 10. ........................ |
| 11. प्रात एव धीवरा तत्र आगच्छन्। | 11. ........................ |
| 12. पञ्चाशद्भिः रुप्यकैः हमे ग्रन्थाः क्रीताः। | 12. ........................ |

## 1.6 सारांशः (Summing up)

...........: यत् असमाकं समस्तमपि प्रचीनं वाङ्मयं संस्कृतभाषामाश्रित्यैव अवतिष्ठते। प्राचीनानाम् ..........., महर्षीणां, कवीनाम्, आलंकारिकाणां, नाट्यतत्त्वविदां, तत्त्वज्ञानां च अक्लान्तपरिश्रमस्यैव एतद् फलं यत एवंविधं सुविपुलं संस्कृत-वाङ्मयम् अस्माकं दृष्टिपथमायाति। संस्कृतभाषाज्ञानं विना अस्य विपुलस्य वाङ्मयस्य ज्ञानं न संभवति। वस्तुतस्तु संस्कृतभाषायाः ज्ञानं तादृशमेकं सुन्दरं सुवासितं च तिलकमस्ति यद् विना भारतीयविदुषां विशेषतः अस्माकं संस्कृतानुरागिणां संस्कृतविद्यार्थिनां समुन्नतमपि ललाटं शोभायमानं न भवति। इयमेका ईदृशी न्यूनता वर्तते यस्याः पूर्तिः अन्येन केनापि विकल्पद्वारेण न संभवति।

व्यवहारिक-संस्कृत-ज्ञानाय अस्मिन् अध्याये कानिचित् पारिवारिक-पत्राणि, व्यावसायिकपत्राणि, आवेदनपत्राणि च संकलितानि सन्ति। संस्कृते बोधशक्तेः विकासाय केचन गद्यात्मकाः पद्यात्मकाश्च अनुच्छेदाः उपन्यस्ताः वर्तन्ते। सहैव तत्तदनुच्छेदाधारिताः प्रश्नाः अपि समुपनिबद्धाः विद्यन्ते। संस्कृतवाक्यप्रयोगे सामान्यतया लिङ्ग-विभक्ति-वचन-कारक-वाच्य-प्रत्ययादिसम्बन्धिन्यः याः त्रुटयः जायन्ते, तेषा संशोधनाय अपि कानिचित् वाक्यानि संशोधनपुरस्सरं वर्णितानि सन्ति।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

भाषा भाषणादायाति। पारस्परिके पत्राचारे, वार्तालापे, गृहे, छात्रवासे, मार्गे, विभागे, विश्वविद्यालये, महाविद्यालये च संस्कृतस्य प्रयोगः कर्तव्यः। पारस्परिके व्यवहारे संस्कृतप्रयोगाय संकल्पः कार्यः। परस्परं संस्कृतेनैव व्यवहारस्य प्रतिज्ञा कार्या। तस्याः प्रतिज्ञायाः, तस्या संकल्पस्य वा पूर्णतया निर्वाहः करणीयः।

क्लिष्टा, दुर्बोधा, दुरूहा चेयं संस्कृतभाषेति मतिः अपनेया। इयं तु सर्वथा सरला, सुबोधा, प्रयोज्या व्यवहार्या चेति मतिः स्थापनीया। विविधासु भाषासु प्रयुज्यमानाः नवभावावबोधकाः नूतनाः शब्दाः संस्कृतस्वरूपप्रदानेन आत्मसात् करणीयाः। अस्माभिः अत्रावधेयं यत् सैव भाषा जीविता समृद्धा च भवति या लोके व्यवह्रियते प्रयुज्यते च। अतः संस्कृतभाषायाः प्रयोगाय भाषायां च नैपुण्यलाभाय च भवद्भिः संस्कृतमाश्रित्व अवश्यं व्यवहर्तव्यम्। भाषणे लेखने वादे विवादे संलापे पत्रव्यवहारे च संस्कृतमेव प्रयोक्तव्यम्। अनेन भाषाज्ञानं अवश्यमेव सहजं सुकरं च भविष्यति।

व्यवहारिके संस्कृते के के विषयाः समावेशनीयाः इति विचारे बहुविधाः विषयाः मनसि समायान्ति। किन्तु विस्तारभयात् अत्र केचन महत्तवपूर्णाः विषयाः एव समावेशिताः वर्तन्ते। विषयविवेचनं ज्ञानसंवर्द्धनेन प्रामाणिकं भवेत्, भाषा च सहजतया हृदयङ्गमा स्यात् तदर्थं प्रयतितमस्ति। विषयोपस्थापनाय या शैली समाश्रिता अस्ति, तया संस्कृतभाषायाः अध्ययने अनुशीलने व्यवहारे च भवतां प्रवृत्तिः भविष्यति अभिरुचिश्च वर्धिष्यते। अस्य अध्यायस्य अध्ययनेन पुनः पुनः परिशीलनेन प्रयोगेण च संस्कृते विविधानि पत्राणि लेखितुं, स्वीयां बोधशक्तिं विकासयितुम्, अशुद्ध–वाक्यानि संशोधयितुं च प्रेरणा समुत्पत्स्वते, मार्गदर्शनं च भवन्तः नूनं लप्सयन्ते इति अस्माकं विश्वासः।

### 1.7 आदर्श–प्रश्नाः (Sample Questions)

1. भवान् लोकेशः। भवतः मित्रं गौरवः छात्रावासे वसति। सः अस्वस्थः। स्वास्थ्यरक्षणाय तं प्रति एकं पत्रं लिख्यताम्।
2. भवती रश्मिः। भवत्याः ज्येष्ठभगिन्याः विवाहः। विवाहे निमन्त्रयितुं सखीं प्रति एकं पत्रं लिखतु।
3. भवन्तः दूरोन्मुक्तशिक्षाप्रतिष्ठानस्य छात्राः भवद्भिः एका राष्ट्रिया सङ्गोष्ठिः समायोजिताऽस्ति। संगोष्ठ्या उद्घाटनसत्रे मुख्यातिथिरूपेण समुपस्थातुं प्रतिष्ठानस्य निर्देशकं प्रति पत्रमेकं विलिख्यताम्।
4. भवान् अर्णवः। भवतः आर्थिकी स्थितिः दुर्बला। परीक्षाशुल्क–मुकत्यर्थम् गौहाटी–विश्वविद्यालयस्य उपाचार्यं प्रति एकम् आवेदनपत्रं लिख्यताम्।
5. संस्कृतविभागाध्यक्षं प्रति संस्कृतभाषया एकं पत्रं विरच्यताम्, यत्र राजनीति–शास्त्र–विभागस्य छात्रैः सार्द्धं कन्दुक–क्रीडा–प्रतियोगितायाः आयोजनाय अनुमतिः प्रार्थिता स्यात्।
6. भवतः विभागे सद्यः संपन्नायाः तर्कप्रतियोगितायाः समाचारं प्रकाशयितुं समाचारपत्रस्य संपादकं प्रति सववरणं सरलसुरगिरा एकं प्रार्थनापत्र विरच्याताम्।
7. अधोलिखितम् अनुच्छेदं पठित्वा तदाधारितान् प्रश्नान् उत्तरतु :–
   ''जीवने धनस्य अत्यधिकं महत्त्वम्। परन्तु लोभेन अन्धाः भूत्वा वयं यदि अधिकाधिकं धनमभिलषामः तदर्थमनुचितसाधनानां च प्रयोगं कुर्मः, उत्कोचं गृह्णीमः, तर्हिं तेन धनेन दुःखमेव जायते। तद्रक्षणे एव भूयान् समयः व्यतीतः भवति। कोऽपि

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

तद् हरिष्यतीति चिन्ता प्रतिपदं प्रतिपलं च परिवर्धते। विवेकं नाशयति अभिमान:। प्रच्छादनाय च कृष्णधनस्य महान् क्लेश: भवति। अत: उचितसाधनै: एव धनार्जनं कुर्याम, कस्मै अपि वयम् ईर्ष्यां न कुर्याम, असहायान् रक्षेम, तेषां साहाय्यं च कुर्याम। त्यागेनैव संरक्षणं धनस्य। त्यागेनोपभोगेन चैव वयमानन्दमधिगन्तुं प्रभवाम:।''

**प्रश्ना:**

1. वयां केषां साहाय्यं कुर्याम ?
2. धनार्जनं कथं करणीयम् ?
3. 'उद्‌घाटनाय' इत्यस्य पदस्य किं विलोमपदमत्र प्रयुक्तम् ?
4. कीदृशी चिन्ता प्रतिपलं परिवर्धते ?
5. वयं कोन अन्धा: स्म:। अन्धा: सन्त: वयं किमभिलषाम: ?
6. क्लेश: किमर्थं भवति ?
7. वयं कथमानन्दं लब्धुं शक्नुम: ?
8. कीदृशेन धनेन दु:खं भवति ?
9. एतस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखन्तु।
10. ''तस्य रक्षणे एव समय: व्यतीत: भवति'' अत्र तस्येति सर्वनामपदं कस्मै प्रयुक्तम् ?

(8) निम्नलिखितं पद्यं पठित्वा तदर्थञ्च विज्ञाय प्रदत्तप्रश्ना: समाधेया:–

शक्नोतीहैव य: सोढुं प्राक् शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं स युक्त: स सुखी नर:॥

**प्रश्ना:**

1. युक्त: नर: किं कर्तुं शक्नोति ?
2. सुखी जन: कीदृशं वेगं सहते ?
3. वेगस्य उत्पत्ति: काभ्यां भवति ?
4. कस्य विमोक्षणात् प्राक् वेग: सोढ़व्य: ?
5. ''अस्मिन् संसारे'' इति कस्य पदस्यार्थ: ?
6. ''पूर्वं'' इति स्थाने किम् अव्ययपदमत्र प्रयुक्तम्।
7. 'शक्नोति' इति क्रियापदस्य कर्तृपदं किम् ?
8. किं सोढ्वा नर: सुखी भवितुमर्हति ?
9. अधोलिखितानि अशुद्धवाक्यानि संशोध्य उत्तरपुस्तिकायां पुन: लिख्यताम्–
   (1) ते बालका: गृहस्य बहि: क्रीडन्ति।
   (2) माता बालिकेभ्य: क्रुध्यन्ति।
   (3) सर्वेषा चतुष्पदानां ज्वलनात् भयं जायते।
   (4) अद्य प्रात एव वृष्टिरभवत्।
   (5) राजान: भूमण्डलानि शासन्ति।

## 1.8 द्रष्टव्य-ग्रन्था: (Suggested Readings)

1. बृहद् अनुवाद-चन्द्रिका, चक्रधर नौटियाल हंस, मोतीलाल बनारसीदास, वाराणसी।
2. अनुवाद-कला, चारुदेव शास्त्री, मोतीलाल बनारसीदास, दिल्ली।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

3. अनुवाद-कौमुदी, दुर्गादत्त शास्त्री, मोतीलाल बनारसीदास, दिल्ली।
4. नवीन अनुवाद चन्द्रिका, नेमिचन्द्र शास्त्री, मोतीलाल बनारसीदास, दिल्ली।
5. विदुरणीतिशतकम्, ललित कुमार त्रिपाठी (सम्पादकः), शाशिप्रभा गोयल (लेखिका), राष्ट्रिय-संस्कृत-संस्थानम्, नवदेहली।
6. संक्षेपरामायणम्, वेम्पटि कुटुम्बशास्त्री, राष्ट्रिय-संस्कृत-संस्थानम्, नवदेहली।

——— ::: ———